डॉ. भाऊ दाजी लाड आयुर्वेद संग्रहालय
DR. BHAU DAJI LAD AYURVEDA MEMORIAL

६२५

॥श्रीगणेशायनमः॥ ॥अथोपव्याहरणमितिमंत्रकमात्दर्शपूर्णमासवनुक्रांतौसं
प्रत्याधानपूर्वकत्वात्सर्वकर्मणांक्रमादाधानंप्रस्तूयते॥तत्राग्न्युपव्याहरणपूर्वकत्वादनुष्ठा
नस्यानंतरमुपव्याहरणमुच्यतइतिशेषः॥अग्निस्थितस्यकर्मणआरंभसमीपवचनमुपव्या
हरणंविज्ञायतइतिब्राह्मणंदर्शयतियस्मिन्नथक्रतादौक्रतुकामंकामयतेयज्ञांगादौयज्ञांगका
मइतिक्रतुकामंक्रतुफलमित्यर्थःयज्ञांगकामंफलं॥आधानमुच्यतेजपहोमादिनिमंत्रैःशो
धयित्वास्वियंविदुषांवचनाच्चैवभार्यायासहवश्ययावसंतेब्राह्मणोग्नीनादधीतअथोख
लुयदेवैनंश्रद्धोपनमदधीतअथवावैशाख्याःपौर्णमास्यादुपरिष्टादमावास्यानवतिसा
सकृत्संवत्सरस्यराद्धिंसंपद्यतेतस्यासमदधीतअथवाकृत्तिकास्वग्निमादधीतेत्यनुवाक
यानिनक्षत्राणिविहितानिविहितानावामन्यतमनक्षत्रेआदधीतउत्तरायणंसर्वआधान

स्यकालःदशमेहन्यग्नीनादधीतेतिदर्शनात्आग्न्याधेयानिकाम्यानिवसंतेकृत्तिकादिषुसद्यस्का
लानिकार्याणिनवर्षोग्रीष्मयारपीतिगोपालेनोक्त्वातदक्षिणायनोपिकालोविहितःदशमेहन्यग्नी
नादधीतेतिदर्शनात्सर्वमासाविवाहस्यतिवचनाच्चउदगयनेपूर्वपक्षेयथोक्तनक्षत्रेषुकोपिस
र्वकाआधानंतदाउदगयनंएवत्संमतिःअग्नीनाधास्यन्पूर्वेद्युर्नंदीमुखंकरोतिरात्रौप्रदोषांते
प्रतिसरबंधाश्वोभूतेस्नानादिकंकृत्वाततःपुण्याहंवाचयित्वाग्नेपासनस्यपश्चात्तंत्रागयेषुदर्भेषु
प्राङ्मुखाउपविशतःउत्तरतःपतिर्दक्षिणापत्नीएवमुपविश्यप्राणायामंकृत्वायजमानोजपतीत्याःपु
रस्तात्प्रसवंतीतितताःअद्यएहिसत्येनत्वादयामीत्युक्त्वाआकूत्यैवेदंकरोतिआकूत्यैत्वाकामायत्वेति
सर्वकामाग्नीनाधास्यइतिमनसाग्निर्ध्यात्वाग्निरुच्चैर्ब्रूयात्आग्निर्यंकरिष्यमाणानसमीक्ष्यब्रूयात्तन्म
क्षध्यतामितितत्तक्षध्यतामितिब्रूयुः।श्रोत्रियोतियजमानःअनंतरमत्विग्वरणस्यप्राप्तत्वात्तेषांलक्षणा

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

न्यंते॥पठनश्रवणाभ्यांवसंप्रयोगेरनिंदिताःकर्तुकारयितुंवक्तुंयेसमर्थाश्चवैदिकेतेषांवैदिककर्मण्यधिकारःअत्रमादीलघुस्वास्वाध्यायाभ्यस्तवैदिकःशोभावित्स्वरःशक्तायुवाविधस्तयातकःआर्ष्यब्राह्मणस्यैवयोनिगोत्रऋतदत्तसंपन्नाःअविगुणागाःअन्यूनातिरिक्तांगाःअत्रिकिणिनःआघातःकिणःमलुकुष्ठवाएतेकिणाःयेषांनसंधियुद्धनिमित्तस्फोटकिणःघृतासननिमित्तैगुल्फःकिणःहस्तमर्दननिमित्तार्यैवैयंनः॥तपरिह्यातिक्रांताःपरिमर्यादाःअनंतिक्रांतमर्यादाःअसमुद्रयायिनोवानंतगाःप्रतिषिद्धदेशगमनरहिताःअवृषलीपतयइत्यन्येनांत्यजाःशरवपुलिंदादिषुजनिरहिताःपुत्रोत्पादनरहितादित्यर्थःअन्वानाःअंगाध्यायिनःहालेयाःहालिकाःवालेयाःएऊणेदिवालविक्रयिणःपरक्षेत्रयस्यजननसंबंधोऽतारइत्यर्थःकनीयसागुणवान्गुणन्यूनःअनुजावरःज्येष्ठंगुरुत्वनयोनोपचरंतिसःदिप्रवरोद्विगोत्रःयोनिर्वृत्तमितियान्यादिर्यहणंआंगिरसादिनियमानावार्थियान्यादियुक्तानामपिअव्यापन्नांगानवनसवपिवादःअध्वर्युश्चाध्वर्युःपुरुषाश्चाकुनखिनोभवंतिअन्यस्यानियमंख्यापयतिए

वमुत्तरेषपिकिलासीकुष्ठीखंडःखंडदंतौष्ठःकरालोदंतुरःशिपिष्टःदुश्चर्माइतिप्रतिप्रस्थायानुक्रमणंत्रसंगनज्योतिष्टोमस्यग्निगरःप्रतिगरस्यस्मारयिताध्रुवगोपःध्रुवस्यरक्षितासंस्तवःप्रातःसवनेवोधिताअन्यमदक्षिणाग्निःऋतदक्षिणतोवाह्याग्निःपरिक्रांताश्चमसाध्वर्यवश्चतान्कर्मणःकर्मणोवृणीतेतिहिकर्मकालेवृणीतवासकृदेवयावज्जीवंहोत्रकादीनांवरणंसहत्विक्पुरुषत्वातदृणेनवृतानवंतिएवंगुणेतिविशिष्टान्पुरुषान्यजमानोवृणीतेअध्वर्युर्वाग्निंडांप्रथमायुज्येतइतितस्मादध्वर्युमुपसंगृह्यपादावारभ्यदेवदत्तशर्महिमाध्वर्यवेणत्वागछामियायितुमांभवान्ऋत्विग्देवोदेवोध्वर्युःसमध्वर्युरध्वर्योध्वर्युत्वंवृणइतिब्रूयात्॥अध्वर्युःऋत्विग्देवोदेवोध्वर्युस्तेनानुमतःकमेवाहंकरिष्यामीतिब्रूयात्तोऽयंतथेतिप्रतिवचनंऋध्वर्यवमितिकेवित्यजमानमित्यपरब्रह्माणमुपसंगृह्यासावहंब्रह्मत्वेनत्वामियाजयितुमाभवन्वद्मादेवोदेवोब्रह्मासतेब्रह्माब्रह्मन्ब्रह्माणंत्वांवृणइतिब्रूयात्सब्रह्माब्रूया

त्स्वंद्रमादेवोदेवोब्रह्मासनेब्रह्मातेनानुमतःकर्मेवाहंकरिष्यामीत्योंतथेतिप्रतिवचनंहोतारमुपसंगृह्यब्रूयात्त्रसावहंत्रेणगत्वागछामियाजयितुमांनवानितिग्निर्देवोदेवोहोतासमहोतेतिवसहहोताप्रत्याहग्निर्देवोदेवोहोतासतहोतेतिप्रतिवचनंपूर्ववत्त्रद्रातारमुपसंगृह्यब्रूयात्त्रसावहमोद्रेत्रेणत्वागछामियाजयितुमांनवानितिपर्जन्योदेवोदेवत्रद्रातासमत्रद्रातेतित्रद्राताप्रत्याहपर्जन्योदेवोदेवत्रद्रातासतत्रद्रातेतित्योंतथेतिवचनंपूर्ववत्सदस्यावेकल्पिकः।वाजपेयेनित्यःसदस्यमुपसंगृह्यब्रूयात्त्रसावहंसदस्येनत्वागछामियाजयितुमांनवानितित्याकाशोदेवोदेवःसदस्यःसमसदस्यइतिवसदस्योप्याहत्याकाशोदेवोदेवःसदस्यःसतसदस्यइतिप्रतिवचनंपूर्ववान्प्रतिप्रस्थात्रीयेणनेष्टीयेणत्राग्नीध्रीयेणहोत्रकाणांसंहत्यप्राग्वरणंसंहत्यवरणपक्षेत्रापोदेव्योदेव्याहोत्राशंसिन्यस्तामेहोत्राशंसिन्यइतिहोत्रकामुपसंगृह्यब्रूयादहोत्रकाःप्रतिब्रूयुःत्रापोदेव्योदेव्याहोत्राशंसिन्यस्ताहोत्राइतिब्राह्मणा

छंदसीयैनपोत्रीयेणत्रछावाकीयेनयावस्कृतेनप्रस्तोत्रीयेणसुब्रह्मण्येनेत्यादिहोत्रकाणांएतद्वरणंकर्तव्यंतत्सुरुषाहोत्रकाःतद्वरणेनवृताभवंतीत्यर्थःवमसाध्वर्यवोप्यध्वर्युर्वरणेनवृताभवंतीत्यर्थःअथवमसाध्वर्युनुपसंगृह्यब्रूयात्तरश्मयोदेवोदेवाश्वमसाध्वर्यवस्तमेवमसाध्वर्यवइतितेप्रतिब्रूयुःरश्मयोदेवोदेवाश्वमसाध्वर्यवस्ततेवमसाध्वर्यवइतिएवंवृतानांमधुपर्कंमुक्तक्रमेणदत्वात्त्विजोदेवयजनंयात्वेतमधुपर्कंसूत्रेणाव्याख्याताःप्रसिद्धत्वादेवयजनंयात्वनोविकल्पःअपित्वतुदेवयजनंयात्वतउक्तत्वात्तदेवयजनप्रसंगात्तदेवयजनलक्षणमाहयथावदक्षिणःपाणिरितिपाणिसाम्यादेवयजनस्यप्रत्यक्दक्षिणोनतार्थलक्षयतिप्राग्उदक्प्रवणमितियथासव्यस्तथापिपित्र्यजनंप्रत्यक्दक्षिणाप्रवणंप्राग्उदग्वानतमितिपित्र्यजनतुल्यंश्मशानकरणंपित्र्यजनवदनियतेणीयेविष्टिपशुसोमेषुवपुरोदकंप्रत्यासन्नोदकमित्यर्थःयस्मादेवयजनमन्येनलक्षितेथापुरोदकंकुर्यात्प्रत्यासन्नो

दक्कुर्यादित्यर्थ॰उत्तरतोदेवयजनस्यदेवयजनमात्रंयथासंनवतितथाकुर्यात्एवंकृतेदेवयजनेप
शुसोमादीन्यजेत्॥ ॥इतिकेशवस्वामिकृतेप्रयोगसारेद्वितीयप्रथमः॥ ॥अंगारसमीपेअग्निहो
त्रमंगारंकल्पयित्वातस्यदक्षिणाद्वारोकुर्वंतिप्राचीवदक्षिणांवमध्येगार्हपत्यस्यायतनंकुर्वंतिपुरस्ताच्चे
क्षुर्निमितआहवनीयस्यदक्षिणतोविषवतिअन्वाहार्यपचनस्यएवंविहारंकल्पयित्वाततोध्वर्युप्रसं
गादधर्षदीनांव्यापारउच्यतेआदित्यएवकर्मांगंनास्यादेतीर्थस्नात्वाशुचयोधर्मआकर्मपरिसमा
प्तेःसहकारिप्रत्ययइतरेक्षत्विक्कयथाविश्वासोनवतितथातेःसहसंवादंकृत्वाअथचतुर्थात्कर्मणोभिस
मीक्ष्यमाणोवेदकर्माणिप्रयोजयेत्प्राङ्मुखःप्रदक्षिणंयज्ञोपवीतीउत्तरांसंगीदेवेषुदक्षिणामुखः
प्रसव्यंप्राचीनावीतीपित्र्येषुएतेषुअनादेशेतिषुन्यासीनप्रक्ष्यथायथार्थंएवंकर्मकुर्वंतिअध्वर्युरि
डादेवहूरितिजपित्वास्रुचमादायस्रुवनाभिप्रायेणवेद्यंकरेणयोमध्येनप्रपद्यतेपूर्वमेवयजमानःअ

धास्तेगार्हपत्यस्यपश्चाद्ध्वर्युतिष्ठंनगार्हपत्यस्यायतमुदुरंतिऊह्यमानमितिऊहंननप्रपद्यतीविराजक्र
मेपत्नानांतसर्वंयजमानेनसहकार्यंतदेशमाद्रियेतातिशन्नोदेवीरितिएवमेवान्वाहार्यपचनस्यायतनमु
दुरंतिएवमित्यूहननप्रपद्यतेणायोरितिदेशःएवमाहवनीयस्यएवमितरयोर्वेदिकरिष्यन्नवतिवेद्यंकरा
वंतरेणोदङ्निष्क्रम्यतांदिशंतियत्रास्यसंभारान्प्रकल्पितानवंतिगंतीतिबहुवचनंनिर्देशात्संभाराणामाह
रणार्थमपियेःप्रयोजनमस्तितेःसहयांतिअपिवासंभारानाहृत्यांतर्वेदिनिधायएकैकंसंभारमेकैकेनयज्ञो
पवीतसंस्पर्शमाचमनादायनिदधातिवैश्वानरस्यरूपमितिसिकताःपदिदर्वेदवदतूषान्नतीःकुर्वाणइत्यरण्य
आखूत्करोऽर्जेएथिव्याइतिवल्मीकवपांप्रजापतिसृष्टानामितिसृदंयस्यरूपमित्यारण्यवराहवितांयत्प
र्यपश्यदितिपुष्करपर्णंयाभिरद्भिरितिशर्कराअग्नेरतश्चक्षुमितिषडिदारण्यशकलान्त्रीन्राजतान्त्रीन्
सौवर्णान्त्रयश्चरूपमित्यष्टौऊर्जेएथिव्याइत्यौदुंबरंगायत्रीयाद्रियमाणस्यदेवानांब्रह्मवादमितिद्वाभ्यां

पर्णेचयातेस्टष्टस्येतिशमीयत्तेस्टष्टस्येतिवैकंकतंयत्तेतांतस्येत्यशनिरहत्तेवातहतंवाविद्रियादश्वत्था
दितिविद्रियस्यग्रामादश्विद्भूतस्याश्वत्थस्यतिस्रःसमिधःआर्द्राःसपलाशाःसप्तारोहाःप्रादेशमात्राः
यथालाभमितिअप्रतिशुष्कत्वाद्वैत्वप्राघशाद्यनिहरतिआश्वत्थीशमीगर्भशमीपरिहृत्तांवाकेवलाश्वत्थी
वाअरणीआहरतिअश्वत्थाद्व्यवाहारात्त्वाश्वत्थइतिद्वाभ्यांसुसंभृतान्संभारान्पुनरेवंसंभरतियंवास
मनरंमित्येकैकंगृहीत्वासादयतिअशनिहतन्नारेदधोरूपंवादारुदारुमुंजकुलायमप्येवंअरणीमुंज
कुलायंहिरण्यशकलंवावडीयित्वादारुदारुधाविभज्यनिदधातिएवंकृत्वा॥ ॥इतिकेशवस्वामिकृतेप्रयोग
सारेद्वितीयेद्वितीयः॥ ॥ब्राह्मणोपन्यासःपिंडपित्रयज्ञस्यथानयस्मेपवसथ्यगवीतिख्यापनार्थंलोहि
तोपप्रवर्त्तनंतंदुग्धप्रक्षालनेनकार्यंसर्वंवाहैवासर्वपक्षेलौकिकान्नवेवाष्टकादीनिअहंपक्षेश्रोपासन
एवअत्रेवहियतइतिअग्निहोत्रेणेवावाग्निमोपासनस्यदर्शयितिएतदशहोतारंहुत्वोत्सृजेत्पुनःस्वकाले

अग्निहोत्राद्यर्थंमंत्रवदुद्धरणकर्मादिष्वेतैर्हुयादितिवचनात्तदशहोतारंहुत्वात्याचार्यवचनात्तयदेवादेव
हूडनंदीव्यन्महंबभूवायुष्टेविश्वतोदधदित्येतेरनुवाकैराज्यहोमःवैश्वानरायेत्याहवनीयस्योपस्थानंयाज
मानं॥ ॥इतिकेशवस्वामिकृतेद्वितीयप्रश्नःसमाप्तः॥ ॥अथाग्न्याधेयस्योपवसथदृतिताःसंवत्सरपुर
स्तादाधादितिएवमादिषुपक्षेषुमध्येकरणादिहापिसन्निधानादुपवसथगव्यस्याग्न्याधेयस्यांगमितिकेचि
त्त्वन्येफलवचनादनंगमिति॥पिंडपित्रयज्ञवन्मध्यसमाम्नानस्याविरोधःअंगत्वेग्न्याधेयंपूर्वाहुतिपुनरा
धेयजन्नरातिरितिविकारत्ववचनाच्चद्वितीयेपुनराधानेब्रह्मोदनेनेतिवचनात्त्रयाःकियताःसंवत्सरपु
रस्तादाधादित्यादिपक्षेसंवत्सरस्यप्रथमदिवसेब्रह्मोदनमाधानात्पूर्वदिवससमाप्तोसंभारसंभरणंउपव
सथ्यगवीवत्त्रयपरेऽहराधानमितिक्रमःपुनरनंगत्वेत्वग्न्याधास्यमानोब्रह्मोदनंपचतीत्येतस्मिन्पक्षेयथाश्रुतंय
थैवक्रमःसर्वानेवान्यान्स्थालीपाकाञ्चरोरन्यान्नित्यसंबंधिनःसंभारानितितान्विशिनष्टिएवकादिभि

ग्रंथितंएकारप्रस्तरणंजपबर्हणंशिरजपधानंनंतणमुष्टिंसकृदाच्छिन्नंबर्हिरितिमंत्रलिंगात्सकृदाच्छिन्नं
बर्हिरूर्णामृदुस्योनमितिगोरालंनपत्नेवरोरभवात्तदर्थानामुलूखलमुसलकुलाजिनशूर्पस्थालीमेक्षण
नांनिवृत्तिःश्मश्रादनपत्नेऽपिवाधौतुमोदनंपत्केतिवचनात्नाम्याधेयगांऋचंतिघोररूपमितिवचनाच्चधे
नैवाएतद्रेतोयदाज्यंपयोवाऽनडुहस्तंडुलाइतिवचनात्वरुपत्नेपिउलूखलादिसंभाराणामनिवृत्तिस्तूष्णी
हणंदशानिवृत्यर्थंदक्षिणतएतत्परिश्रितंपछन्नमंडपइत्यर्थःदक्षिणतइतिशब्दसंबंधत्वात्अन्यस्यप्रकृतस्य
त्तरस्याभावात्देवाद्वयजनस्येतदितितस्यसमीपेपरिश्रितदेशप्राङ्मुखस्यकेशांतकरोतित्वलो
श्मश्रूण्येवायेवपतेअथोपपत्नावर्यकेशान्यदाकेशाञ्जपेंततदावपेत्प्रकृतिमंत्रेऽपःअन्वेदानेतिप्रदर्शना
र्थंतूष्णीयहणंअग्नेभ्रूश्चवपनंकृत्वाततऽपपत्नीऽवत्तापभ्राद्नपुंजीलानिऽपनिपत्यवपतिवपेत्ववयंद्
तिपुंजीलंविशाखोदर्पःसमीपेलग्नान्कपम्यवपतिऽत्तदेशंयजमानोभिमृशतियानिमइतिपत्न्याअपिमं

चेणकेशवर्जंवपनंकर्तव्यंअथेनमुत्तकेशश्मश्रूनिकृत्तनखानीयितेनिष्पादितेऽदकुंभेनाभ्यवनख्यनात्साङु
स्प्यअहतंवासःपरिधायगंधपुष्पादिभिरलंकृत्यौऽनेनाक्तेअथेनमध्वर्युःएकाविंशत्यादर्भपुंजीलैस्त्रेधावि
नक्तैःसप्तभिःसप्तभिस्तूष्णीपवयित्वात्रेधाविनक्तैरित्येवसिद्धेःसंख्याववनंनियमार्थंऽदपात्रमादायदक्षां
शमित्वादक्षांदिशमितिनैर्ऋतींदिशामितिदक्षांदिशंपत्येषावैनिर्ऋतैदिगितिदर्शनात्अथवासिंहमेमन्यवा
केतांदिशमेताअपऽत्सिंवतियस्यामस्यदिशिद्वेष्योभवतीतिवचनात्द्वेष्यसंबद्धादिगहोच्यतेवैतुष्यथऽद
पात्रंनिधायोदपात्रेआत्मानमवेक्ष्यमानंयजमानंपाप्मनोविधिन्वावयतिसिंहमेमन्यरितिविनीविभक्त्यभि
धीयतेपाप्मानियेवयिषुवातान्सिंहादिसंबंधान्मंत्रातित्यर्थःपत्नीवावेक्ष्यमाणाआस्तेसिंहमेमन्यरित्यात
मेतमनुवाकंनिगद्यापःद्वेष्यसंबद्धायांदिशिनिनीयपात्रंनिरस्यअनवेक्षमाणाआयंतीतिबहुवचनादध
र्युर्यजमानयोरुक्तत्वात्पत्नीतृतीयेतिगम्यतेतस्यागमनेऽन्यप्रयोजनाभावादुपात्रनिनयनस्यवाध्वर्यु
कर्तृकत्वादादायवावयतीतिसमानकर्तृकत्वात्तस्यातूष्णीमवेक्षणमेवप्रयोजनंतस्मात्तदपेक्षंबहुवच

नमितिगम्यतेहस्तदोपोन्प्रक्षाल्येतेनैवयथेतमेत्ययथेतमित्येवसिद्धेएतेनैवेतिवचनस्यप्रयोजनंप्रदक्षि
णमादित्यगमनेअपसव्यमादित्यगमनंअपसव्यमादित्यगमनेप्रदक्षिणमादित्यागमनंमितियथाव्यवा
योनभवतित्यर्थेत्यर्थः॥एवंसर्वत्रएतेनैवयथेतमेत्यहस्तपादान्प्रक्षाल्यपवमानःसुवर्जनइत्येतमनुवाकं
यजमानंवाचयन्त्यात्मानंयजमानंपत्नीवाध्वर्युःस्वयमेवपोक्षतितोयजमानअमात्यादिध्यमादीप्य
अमात्योलौकिकाग्निःतमादीप्यन्वाहार्यपचनवेलायांवेलास्थानंदूतःप्रभृतियाजनंपुनरामात्यदितिकेचित्
अन्वाहार्यपचनवेलायांसादयित्वानिधायशोधयित्वाप्रज्वाल्यपरिस्तीर्यपरिस्तरणंयथाप्राप्तंअग्नेर्दक्षिण
तःपात्रासादनंदक्षिणापवर्गःपवित्रेकृत्वाज्यस्थालीस्रुवंवसादयित्वाप्रोक्ष्याज्यंसंस्कृत्याग्नेरुत्तरतः
सादयतिवटूदुम्बरीदर्भैरग्नेर्दक्षितःसर्वानवपेत्कयर्हिकान्संभारान्पिंडपितृयज्ञ
पात्राणिसादयतितृणमुष्टिंस्यास्त्रमितिवदक्षिणतोधिदेवनस्थानंकरोतितत्रएकस्मान्नपंवाशतोअ

॥७॥

न्निवपतिनिवर्तीतिवद्वुदुम्बरनंकर्त्तव्यमार्थेसकृदेवदक्षिणापवर्गंउद्धननंकरोतिपिंडस्थाने
स्थेनदक्षिणापवर्गंरेखांकरोतिउद्धननदेशमद्भिरवोक्षतिउदीरतामितिअथाग्नेरुल्मुकमादत्ते
यजानादृतितेनोल्मुकेनोद्धननदेशमभितपतिअग्निःपावकदृतिउल्मुकंतस्मादपकृष्यतस्मिन्ना
ज्यबिंदुंप्रद्योतयतितत्तउद्धननदेशेदक्षिणाग्रंबर्हिस्तृणातिसकृदाच्छिन्नमितिअथपित्र्यनावदृय
तिउदीरणादृतिअथपित्र्योदक्षिणतोवापुरस्ताद्वाएरकोपबर्हणंनिदधातिआशनेशयनमिति
ततएकंउदकुंभमादायअद्भिहस्तेनतल्लोमार्जयतिअथेभ्यःपानान्याहरपतिमधुपानंक्षीरपानं
सक्तुपानंअन्यतमंवावायदाहरणितदावषट्पदेकंतदाहुषट्पक्षेत्रीणिब्राह्मणेभ्योदत्वादृतराणित्री
णिबर्हिषदातिएतद्वःपितरःपानंएतद्वःपितामहाःपानंएतद्वःप्रपितामहाःपानमितिददातिएकप
देदिधाकृत्वाएकंब्राह्मणायदत्वाअन्यत्समस्तंनैवमंत्रेणसकृददातिएतद्वःपितरःपितामहाःप

पितामहाः पानमिति अथवा एकं षोडाकृत्वा त्रीणि ब्राह्मणेभ्योदत्वा दूतराणि पूर्ववदनुषंगेणददाति अस्मिन्काले पूर्वशेषेणमार्ज्जयति तत्स्त्रीवचनाभावात्सकृदेवमार्ज्जनमिति केचित् एवं कृत्वा चत्वारिः पितापुत्राः तदन्यर्युपविशंतिपितापुरस्तात्ज्येष्ठोदक्षिणतः अनुजः पश्चात्कनिष्ठउत्तरतः एवमुपविश्यपितृज्येष्ठानुज्ञाद्वादशद्वादशान्नविजयंतेअतिशिष्टंविषमत्वात्कनीयान्नुज्ञितः तस्मैकतमित्यक्कान्नानुपसंहृतियजमानस्यपुत्रौद्वौभवतश्चेत्ततोद्विरायामः पितावत्विंशत्यन्नानाद न्नेज्येष्ठोद्वादशोत्तरान्कनीयानुज्ञितः यद्येकःपुत्रःजायातृतीयाविधिः पूर्वत्पुत्रान्नावद्वावपिद्वि रायामोतथापिभार्य्यवपराज्ञितावेषम्याप्रथमपक्षेकनीयसिज्ञितशेषेषुत्रिषुषण्वन्यायः त्रयाणामुक्तेअथद्वाविंशतिःषड्द्वयोरितितृतीयज्ञितशेषयोः पितृज्येष्ठयोः जायापत्योरुक्तंउन्नोद्विरायामावितिकृतंकृतमितिमंत्रदृतिएवमित्यस्यार्थंकथयंतीतियथात्वत्रित्वार्य्यवमेवसर्वेष्वेग



लंतिएयक्कुर्यंतियपगमनंव्यवछेदःगोरालंभपक्षेघृतागौरित्यक्तोत्तिष्ठतिस्रोदनपक्षेघृतस्रोदनद्र तिस्रोदनपक्षमाश्रित्योच्यते॥पराज्ञितस्यद्रव्यंतद्भृतोदनस्यद्रव्यंगृहीत्वाज्येनवापयसावाश्रपय तित्वास्त्रीअवहततंडुलप्रक्षालनजलंनिधायचरुंश्रपयित्वाघृतमाज्यंपयोवानीयाभिघार्यवपाहो मार्थंपिंडमुद्धृत्यपंचसंस्कवाज्याहुतीर्जुहोतियःआवीरितिप्रथमंअंतर्दधपवतेरितिद्वितीयंअंतर्दधात्त तुभिरितितृतीयंयन्मेमातेतिचतुर्थंयद्दःक्रव्यादमितिपंचमंअथवपास्थानंपिंडंत्रेधाविभज्यउपस्तर णमभिघारणंयुक्त्वोदुंबर्यदध्वर्जुहोतिसोमायपितृमतेस्वधाग्नयइतिस्रुवेणप्रथमंअंगिरस्वंतमृतयद् तिद्वितीयंयद्दग्नेकव्यवाहनदृतितृतीयंतत्स्त्रीदक्षेभ्याधायततःपिंडान्कृत्वाद्वितीयस्योदकुंभेस्थाधे न्नित्रिषुस्थानेषुतत्स्त्रीमार्ज्जयित्वापिंडान्ददातिएतन्नेततासोयेवलोमशान्वस्येषातेप्रपितामहदृतितृतीयंअत्रपितरोयथाभागं

दृंध्मित्यक्त्वाद्वितीयस्योदक्रंजनस्यशेषंपूर्ववन्मार्जयतितंदुलप्रक्षालनजलेनपूरितंतृतीयमुदक्रंजनंपिंडस
मीपप्रवर्तयतियानिरक्षांसिअसृग्भागानियेनपतितगर्भाःपश्यामायेवपक्वायक्रमारायाःस्त्रियइतिचतुर्भिः
प्रवर्तयतिपुनःपुनःपिंडसमीपेअंजनाभ्यंजनादिमनश्रद्धानीतंपिंडंयज्ञवत्कृत्वापरिहितंवासःएवंगोपित
यज्ञविद्ब्राह्मणायदत्त्वासनीयंउत्सर्गीयंवासःपरिधायदक्षिणोपपरेत्यदक्षिणादिशंगत्वावतुर्थेनोदक्रंजनमा
र्जयतियासुगंधारसावर्णायाऊर्जमिनिष्क्रंतियासांनिष्क्रमणेसर्वासामिमेत्रयोलोकाःयाःप्रावीरवतीर्यादक्षिणारव
तीर्याःप्रतीरवतीर्योदीचीरवतीर्यऊर्ध्वरवतीःइत्येताभिर्मार्जयित्वापरिहितंत्याज्यंवासोविमुच्यततःक्षौमंपरिधाय
प्राजापत्यंपवित्रंसमीपंगत्वापूर्वएथकृत्वातमुत्सृजन्मंत्रंप्रक्षिपतिअभूदृतइतिब्राह्मणेभ्यःपिंडानोदनंदत्त्वाए
तस्मिन्नेवाग्नौजयनभ्यानान्वाधानंतोमात्यहोमानजुहोतियज्ञादयआधर्यवमितिकेचित्एषहवाउपवसथंदृत्या
दिब्राह्मणग्रहणयहणं॥ ॥इतिकेशवस्वामिकृतेप्रयोगसारेतृतीयप्रथमः॥ ॥अग्नीनाधास्यमानदर्शारभ्य
दर्शारंभेउपवसथःगव्यनित्यतावाख्यायतेआधास्यमानविष्यत्कालसामान्यविवक्षयाषानित्यादिराजतश्चौत्रि

राम
॥९॥

र्धितःतस्यअतिकालेवाश्रद्दायुक्तस्यब्राह्मणग्रहणंदूरुक्त्वातदोहिण्यामग्निमादधीतस्वएवैनयोनौप्रतिष्ठि
तमाधत्तेनद्वित्यननेतिनित्यत्वख्यापनार्थंदृतरेषामपितुखलुकादियुक्तानीतिवचनादनित्यताज्ञुष्टदृष्टसे
वेवाकुटीवामंडपोवागार्हपत्यस्यअतिशिष्टानामर्थानादायदक्षिणयाद्वारोपनिर्हरतीतिदर्शनात्तदुद्धृत्या
वोक्ष्येत्यादिनाकृतमनुस्मारयतिमानुषेणलौकिकेनव्रतापायनीयंव्रतकालभोज्यमित्यर्थःआहाराधर्थंव्रतो
पायनीयमितिसर्पिर्मिश्रंदंपतीअग्नीयातांअथाधिकृत्तस्तयेउपरीगतोदृक्षंस्तयेयस्मिन्कालेरश्मयःदृक्षा
णामुपरिभ्रमंतिस्मिन्कालेअर्धास्तमितेकालेवासवौषधमाज्यस्थालीसस्रुवंबर्हिवासःशकलानित्यत्सगा
दायसवौषधमितितिलमाषादृत्यादिभ्याम्आरण्याश्चवाससाक्षौमेणवासंपत्नीःपत्नीयजमानाधर्युब्रह्मा
दयःअंबरीषंवोत्तपनीयंवाअंबरीषमग्नपवनाग्निंअंबरीषवाअग्नंक्रियतइतिवचनात्कपालादिसंतापट्टं
उत्तपनीयंतयोरन्यतरंवाओपासनाग्निंवागछतिओपासनस्यसर्वयहणपक्षेसर्वंअदृयहणपक्षेउधत्ताद
धीतअर्धयहणपक्षेओपासनएवएषामन्यतमंगत्वाशकलानग्नौप्रक्षिप्यबर्हिषापरिस्तीर्यगृह्योक्तेनविधि

नाज्यंसंस्कृत्यऽध्वर्युर्यजमानोवांजलावुपस्तीर्यसर्वौषधीप्रक्षिप्यानिधार्यजुहोतिऽअग्नयेसर्वौषधायपुष्टे
पूषन्नायस्वाहेतिततोध्वर्युस्तस्मिन्नेवाग्नौजयानाभ्यातानाच्चक्षुन्नतोमात्यहोमाश्चस्कवणडुत्वाऽथस्रु
वेचतुर्गृहीतंगृहीत्वाप्रजापतेनत्वदेतान्परिददातीतिचतुरोगृहीत्वाग्नेरितिजुहोतिएतानग्नीन्सतेवा
कुंडेवापात्रेशरावेवायजमानोगृह्णात्यायुषेगृह्णामितेजसेगृह्णामीतिताभादायोपतिष्ठतायुर्मामावि
शतितितानध्वर्वेसंप्रदायोद्दायत्यन्वारब्धेयजमानेपूर्वेणगतनमार्गेणपुनरत्यगार्हपत्यस्यायतनेन्यप्र
धायपरिसमुह्यपर्युक्षपरिस्तीर्यएतान्पात्रान्सादयतिभोजनपात्रीमाज्यस्थालींनिर्वापपात्रींवरुस्थालींमे
क्षणंचस्रुवंवसुसलमुलूखलंशूर्पंचकृष्णाजिनंदर्भासंस्तोभिरद्भिःप्रोक्ष्यग्नेदक्षिणतोब्रह्मयजमा
नयोरासनंकल्पयित्वातत्रोदितंवर्मानडुहंग्नेःपश्चात्प्राचीनग्रीवमुत्तरलोमस्तीर्यकृष्णाजिनंवातस्यवा
हसःकालेऽष्टभागयवायांवासंपवित्रेणस्तृणःपात्रीव्रीहीणान्निर्वपतिब्रह्मणेजुष्टंनिर्वपामीतिमंत्रेण
तूष्णींवःसपवित्रेणदर्भान्निर्वपतिमंत्रपक्षेनिरुक्तानभिमृशतिव्याकृतैताकामायतेतिपुनर्व्रीहीन्शूर्पे

॥१०॥ राम

समूह्यवर्माद्भिरभ्यनिरस्यतिऽअथैतस्मिन्नेववर्मणीतिकृष्णाजिनेवापूर्वमारुयतंवर्मतद्धानादयोह्यन्तर
तःप्रागग्नेर्निधायतस्मिन्नुलूखलंनिधायावहत्यग्निष्कृत्यग्निःप्रक्षाल्यतंडुलान्शूर्पेणवरुस्थाल्यां
प्रक्षिप्यनिर्वापपात्रेणचतुरुदयानानयतिपात्रशब्देनोच्यतेयद्व्रीडितादृढास्थालीभवतियद्व्रीडितातदा
पंवावदुतरावासमादकसुक्षोदकःब्रह्मोदनश्चपणमश्नावयसीवातंसमर्थःकश्चनपरीघेनश्चपयित्वो
सर्वतोग्निनायथाश्रुतविदग्धरहितोभवतियोविदग्धःसनेतीयाश्रुतःसरोदृतिदर्शनात्तथाश्रप
यतिऽअध्वर्युराज्यसंस्कारकृत्वाग्नेःक्षणंसंमृज्यतेनवाभिघार्यस्रुवावचनान्मेक्षणेनवोदकंमुद्रासयतिऽअ
थैनंवरुऽअपतिगवेयाग्निकाले वेगाऽआयातितत्ऽआयातिगवंतिष्ठद्गतित्वादव्ययीभावान्नपुंसकं
ऋत्विग्भ्यःसतोब्रह्मोदनइतिप्राहुःबहुवचनात्परिक्रमिणऽआध्वर्यादिभ्यःउपसंगच्छतेएनमेतद्ब्रह्मजः
तेसर्वेऽध्वर्यादयःसहैवब्रह्मोदनसमीपंगच्छंतिऽअथेतांपात्रीमितिऽअप्रकृतत्वेएतामित्यसंभावदेत
देवज्ञापयतिप्राङ्निर्वपात्परिस्तरणानंतरमवसादयि

त्राप्रोक्षतीतिभोजनपात्रीवरुस्थालीनिर्वापपात्रीमाज्यस्थालीमक्षणादन्यपिधयोजनवदतिरिक्ताभोज
नपात्रीनिर्णिज्योपस्तीर्यत्रनुपस्तीर्यवातस्यामेतंवरुंवरुस्थालीमसघ्नंनिवपत्रवालयन्निवोद्धरति
सर्पिरासेचनंकृत्वाआसिच्यतेस्मिन्नितासेचनंओदनस्यमध्यगतंकृत्वातस्मिन्नमृतमाज्यमानीय
मक्षणेनोपहत्यजुहोतिप्रवेधसइतिस्वाहांतेजपस्थानपक्षेस्वाहाकारांतःअथेतान्एतानित्यनंत
रोक्तर्त्विजउच्यतेतेआर्षेयामहर्त्विजःहेधआर्षेयाएवब्रह्मौदनंप्राश्नीयुरितिएषवेब्राह्मणऋषिरार्षेयो
यःशुश्रूवानितिश्रुतौतस्मिन्महर्त्विजएवब्रह्मौदनंप्राश्नीयुरत्रधवतेप्रथमंतान्वृ णीमवतीतिवाक्यं
महर्त्विजएवार्षेयाइतिनास्तिविरोधःअथवशब्दश्चोपपन्नोभवतिअन्यथात्र याब्रह्मौदनमित्येव
स्यन्नश्रुतस्तंनिवृत्यर्थमेतानितियहणमेतानध्वर्यादीनुत्तरतोनुदिशमुपवेश्यताननुपूर्वमाचक्ष्य
तेभ्यसनमोदनमूर्मिस्पृशन्नअनुद्यम्यानुछायहस्तेनऊर्मिस्पृशन्नित्यर्थःअनुछिदंनिवानुक्रमेणा

नुमजन्निवसाधारणेनेत्यर्थःउपोहतिमध्यमंप्रवेशयतियद्दोमापनमितिवात्स्लीवातेमध्याद्रास
त्रयंप्राश्यप्रशंसंतिराद्धस्तेब्रह्मौदनइतिभ्यःसांडंवत्सतरंददातिनुक्कावम्यप्रतिगृह्णंतिरुद्रायगामिति
प्रतिग्रहःअथैषउत्तरतआसीनकश्चिद्ब्राह्मणःक्षामकाषंउषायालेभमोदनंप्राश्नंतंतस्मैब्राह्मणाय
यदस्यैंजमानस्यउपपद्यततददातिननियमइतिअथयदाज्यमुछिष्यतेनुक्कवत्स्रुपात्र्यांयदाज्यमु
छिष्यतेतेनसमिधोभ्याज्याभ्यादधातिसमिधाग्निंदुवस्यतेतिअथमांउपतापंहविष्मतीरतीद्वितीयां
तंतासमिद्भिरंगिरइतितृतीयांसमिधोभ्याधानेविशेषःऋत्विद्भिःसृक्त्वाशितेअप्रक्षृष्टसमिधोभ्य
ज्याभ्यादध्यात्॥अत्रैवैनाःपार्श्वतःसमज्यतेसादयतेयदासवंप्राश्नीयुरथेनापात्रीनिर्णिज्ययत्स्रु
त्यामाज्यमतिशिष्टंस्यात्तत्स्रुवदभ्यनीयतेनसमिधोभ्यज्यादध्याद्वासमित्सवत्सतरींददातिसमि
त्साहितास्वितिशेषःआध्वर्यवंवत्सतरातेददामीतिरुद्रायगामितिप्रतिग्रहःततोयजमानायाराणाय

यछन्नाहवावयमोनविष्यसिसंशाधियन्तेसांशिष्यमितियजमानोप्याहब्राह्मणानाशयताध्वंगोपाय
तेसंनारान्निधन्तेतिएवंकृतेतस्ययजमानस्याग्न्याधेयंसुनिर्हुतंभवतिब्राह्मणोऽजनविनाआधानदु
र्निर्हुतंभवतितस्मात्सम्यृतंनोऽजनेदयमित्यर्थःसाग्न्याधेयस्यसम्यृद्ध्यैग्न्याधेयंगांकुर्वन्तऽजनार्थंप्रति
शेधःघोररूपमितिदृतिहतोनवतेवेतिद्वितीयःपक्षःअपित्वनैवंकुर्वीतकाममरणंस्यादापिवह्नी
रपिकुर्वीतएकोपिशद्यायद्यर्थंयदिकुर्वीतअनुवेतस्यएवंकृतेअनंतरंतस्ययजमानस्यपुण्याप्रसं
साभवेदितिकात्यायनःअथास्माअरणीःप्रयछतिअस्मैयजमानाध्वर्युःप्रयछतिनीतेप्रतिगृह्णाति
महीविश्पत्नीइतिअपराजएतेवारणीप्रयछेदतस्मिन्यक्ष्यावयमोनविष्यसीत्यादिकुर्यात्अपराज
एवंस्कपदेशअथैतेऽपनिगृह्णातिअरणीऽरासिश्लेषयतिन्नत्वियवतीस्तइतिअथैनंयजमानमन्य
तास्त्यमुपनयतिमानुषादेव्यमुपनयतिइदमहमनृतात्सत्यमितितंवावंयद्दृष्टहरिकथाश्रवणादि

नाद्दृष्टंयदिनावावाणीणात्एवंनैनमेतांरात्रिंजागरयंतीतिआपस्तंबोप्याहरात्रिंजागरयंतआसतेरात्रि
मितिसर्वारात्रिमित्यर्थःशल्कैस्तांरात्रिमग्निमिंधतेशल्कैरग्निमिंधानइतिगार्हपत्यस्योत्तरतःकल्माष
जंबंधातितेनैनंयजमानंदर्शयत्यध्वर्युःप्रजाअग्नइति॥ ॥इतिकेशवस्वामिकृतेतृतीयेद्वितीयः॥ ॥
अथाध्वर्युरपराजआहृत्यअध्वर्युर्ग्रहणंनिष्पतस्यसमारोपणात्तस्यसमारोपणस्ययाजमानत्वात्
प्रधान्यतस्तन्निवृत्यर्थंशल्कैरग्निमिंधानइतिलिंगात्याजमानत्वाच्चाध्वर्यवत्वाच्चसंस्थापनस्यनियमार्थं
चअपराजइतिजघःसमीपकालोविवक्षितःतस्मिन्नुपक्रमरणीनिष्पेदितिदर्शनात्अपराजआ
गतेअध्वर्युर्यजमानस्यहस्तादरणीआदायदक्षिणोत्तरांसव्येनाधारांतेब्रह्मोदग्ग्रोनिष्पतिज्ञातवेदोनु
वनस्पतरेतइतिअयंतेयोनिर्ऋत्वियइतिचअथैनमभिमंतेसमुप्यदक्षिणंतोज्वलयंतआसतेततोप्या
यतनानिशकृत्पिंडेनपरिलेपयतिअपेतवीतेतिगार्हपत्यस्यायतमेकमेवपरिलिंपेद्वा।ततःसंभाराणांत

तीयमादाययजमानेनान्वारब्धोगार्हपत्यस्यायतनेनिवपतियत्यथियाअनामृतमितिसभ्यावसथ्य
सभवेपंचममितिप्राप्तेतृतीयमितियहणंतदापिसंभारनिवपनंतरयोर्नास्तीतिबोधयतितयोरनित्यत्वा
त्रनित्यत्वेपितयोःसंभरनिवपनेविकल्पःतृतीयंसंभाराणांत्रेधाविभज्यसभ्यावसथ्ययोराहवनीयेवा
सभ्यावसथ्ययोःसंकल्पइतिदर्शनात्रआधीयमानेषुसंभारेषुवृषादियदापश्यतिदातजपतियदद्भ्यं
इमसीतिनादधातिदिवस्त्वावीर्येणेतिस्पष्टामंत्रजपःअथैतान्संप्रयौतिमिश्रयतिसंवःसृजामी
तितान्कल्पयतिसमीकरोतिकल्पेतांवासइतिवासंतिकाहतइत्यविकारेणसर्वेषांसर्वर्तुषुऋतुयह
णस्याग्रहणलक्षणत्वात्यथर्तिपदवचनाच्चअथातिशिष्टानांसंभाराणामर्धानादायदक्षिणयाद्वारग
त्यान्नाहार्यपचनस्यायतनेनिवपतियदंतरिक्षस्यानामृतमितिसमीकरणांतंपूर्ववत्गार्हपत्यवदित्यर्थः
अथैतेनैवयथातंत्ययथातमितिनिधायापसव्यंमावृत्येत्यर्थःअतिशिष्टान्संभारानादायापूर्वया

द्वारागत्याहवनीयस्यायतनेनिर्वपतियदिवोनामृतमितिसमीकरणांतंपूर्ववत्सभ्यावसथ्ययोःसंभार
पक्षेनिर्वपनंमंत्रवर्जंतुल्यंततःपरिक्रमिणमग्नीन्रुद्धेतिसमादिशतिअथपरिक्रमोविहृताभ्ययइति
प्रैषमाहाध्वर्युःप्रदक्षिणमागत्यगार्हपत्यस्यायतनेउपरिसंभारेषुमुंजन्नलायनिदधातितस्योपर्य
धरारणीप्रागायतामुदगायतांवानिधायपश्चिमप्रदेशमंथनप्रदेशोभवतितस्मिन्प्रदेशहोतारंजपित्वाउ
त्तरारणानिधायसोध्वर्युर्मथतेतियजमानंब्रूयात्यजमानःप्रथमोमंथतियजमानउत्तमःअभ्युत्पन्नो
वरंददामीतिवाविसृजतेयजमानःवरंतेददामीतिवरमित्यृक्तेब्राह्मणनगोर्दयाक्षत्रियेणयामःवैश्ये
नहिरण्यंरुद्रायगामित्यध्वर्योःप्रतियहमंत्रःजातमग्निमुपतिष्ठतेयजमानःअजीजनंनमृतमिति
अग्नेरुपरियजमानोभिप्राणकरोतिप्रजापतेप्राणस्त्वातिअथोद्गातारमाहारथंतरंबृहीतिउद्गातुर
भावेब्रह्मन्त्समानिगायेतिसयोनीर्व्याहृतीर्वाहिंकारंवाजपेत्अथैनमादधातिन्यूंडोवोघर्मःशिरइति

आदधाति स्रष्टाजपतीति केचिज्ज्वलयतीत्यन्ये गार्हपत्यत्वनावधारयतिवा।भ्रूर्नुवोघर्मःशिरइत्यु
पक्रम्यचुगाणांत्वाव्रतपतेव्रतेनादधामिनार्गवोगायत्रेणछंदसेतिऋगाणामंगिरसांत्वाव्रतपतेव्रतेना
दधाम्यंगिरसोगायत्रेणछंदसेत्यंगिरसांएवमन्येषांगोत्राणांभ्रूर्नुवोघर्मःशिरइत्युपक्रम्यआदित्यानांत्वा
देवनांव्रतपतेव्रतेनादधामिकाश्यपोगायत्रेणछंदसेतिवाशिष्टानांएवंसर्वेषाममेरुत्तरतोभावेवहिर्
ण्यशकलमवदधातिस्वयातनुवास्तंबभ्रवेतिराजतंशकलंदृषलायवाज्ञायब्राह्मणायवाप्रयच्छतिअथे
नमुपतिष्ठतेअहंत्वदस्मीतिअथेनमग्निमादृदतेएतमितिब्रह्मोदनाग्निंगार्हपत्याद्आन्वाहार्यपचनमा
दधातिभ्रूर्नुवोवातःप्राणइत्युपक्रम्यामीषांवेतिपूर्वद्धिरण्यशकलोपासनोद्धरणानांतंअथेनमुपति
ष्ठतइमाश्चमामुपतिष्ठंतिइतिअथापसव्यमेत्यगार्हपत्येआहवनीयप्रणनार्थंइध्ममादधातिआह
वनीयप्रणयनकालेयथायोग्यंभवतिनानातिदग्धोनातिक्लिन्नोभवतीतिस्रुत्रुवपात्रमुपयमनंतदभि

ना

राम
॥१४॥

DEBHAU DAJI

सामीपेसादयतिपल्यूलितःस्थापितःपूर्णवाट्युवाश्वःपुरस्तात्तिष्ठतिअश्वाभावेअजाअश्वा
गावइत्यन्योन्यंप्रतिनिधयःअथोद्गातारमाहवोमदंब्रूहीतितदभावेब्रह्मन्छंदसिब्रूहीतिप्रै
षावृत्यःसोपिव्याहृतीर्हिंकारंवाज्ञपेत्तमिध्मंपात्रेपात्रेनिधायोपयमनेनोपयम्यतमुद्यछ
तआजसेबलायत्वागछेतिजानुदघ्नेत्रिभागंततोग्रीवादघ्नेत्रिभागंओदनकालएवतामात्राःसं
पादयेदाअश्वंपूर्वेनयंतितन्मनुमंत्रयतेआसीमनुप्रदिशमितिविषुवतिमध्येउपरमंतिविक्रम
स्वमहाःअसीततोगछंत्पंचमिरुषसामदितिअग्निमन्यस्यहस्तंप्रदायप्राङ्मुखोश्वेनआ
हवनीयायतनमुत्तरतःसंभाराणांपार्श्वेतआक्रमयंतिसदेशाविशिष्यतेआहितस्याग्नेरगाराःप
रस्यापरिषोध्यंभवतिवरुणायाश्वमितिप्रतिग्रहमंत्रःअन्यमश्वंब्रह्मणेददातिअश्वाभा
विकमंडलुंपरआधीतेतिबहुहवब्राह्मणंअधीतेकालेतयोरवप्रदक्षिणंप्राङुत्क्रम्यप्र
थमवर्त्तेरन्ततथाक्रमेरन्ततश्चप्रदक्षिणमावृत्याद्विरध्वर्योर्दंडमुत्सृजतिसए२

सऽस्वस्तिषऽनऽइमꣳसंभारेषुप्रतिषपयतियदिदंदिवऽतिऽह्नातारमाहऽहवनीयꣳसे
नमितिगायंतितेऽनावेब्रह्मन्नछंदसाब्रूहीत्यकोहवनीयमादधातिऋतुभिःसुवर्कश्चेत्यादि
दिरजतप्रदानांतंगार्हपत्यवत्तमुत्तिष्ठतिआनशेव्यानशदितिअत्रैतावन्नीआदधातिसभ्यावस
थायंवस्तत्पूर्वमावसथीयआदधातीतिवचनात्उद्वननप्राक्षणसंभारनिवपनादिकास्तिआहव
नीयात्पूर्वंसद्यस्तत्पूर्वमावसथीयःआदधातीतिवचनात्उद्वननादिव्याहृतयोघर्मःशिरइत्याद्
योनसंतिऋणामित्यादयस्तिआपिसभायांसभ्यःअवसथ्याहवनीयंआहवनीयेसभ्यावसथ्य
योःसंकल्पेवाआधानप्रभृत्यैवैतेअजत्वास्फरित्येतस्मिन्पक्षेसर्वेषामजस्रदृतिकेवित्ययज्
मानस्यछाप्तिकाउदितआदित्येब्रह्मवर्चसकामस्येतिशास्त्रांतरमाहसत्याषाढःनक्तंगार्हप
त्यमादधातिदिवाहवनीयंअर्धोदितेसूर्येआहवनीयमादधातिपुरोदयमुदितेवानुदितेवाब्र

ह्मवर्चसकास्यप्रणीतालोकेरथचक्रंनप्रवर्त्तेदासंयुक्तंरथमेवप्रांवंप्रवर्त्तयेद्वातद्वपिनवाततो
ग्नीन्परिमुह्यपरिस्तीर्यथयजमानःसर्वौषधेनव्याहृतिभिःस्वाहाकारांतैःसर्वान्ग्नीन्शम
यित्वापंचानांघोरशमनंकार्यंओषध्यःसक्तवःपुष्पंकाष्ठंफलंमूलंतृणंएतद्धस्तेनहोतव्यंनान्य
त्रविविदवोदनादितिवचनात्हस्तेनहोतव्यंततएकैकस्मिन्नग्नौपंचपंचनावृक्षीयायाःसमि
धोभ्यआदधातिसमिध्यमानइत्यर्थोघृतप्रतीकइत्युदुंबरंत्वामग्नेसमिधानमितिपलाशंता
मग्नेअद्भिवइतिशमीघृतवत्तेतस्यतइतिवैकंकतएवंसर्वेषुसभारनिवपनादिसमिदा
धानांतंयजमानेचारंभःकर्त्तव्यःप्रदक्षिणमावृत्यगार्हपत्यस्यपश्चान्निषऽतनूरुपतिष
तेयजमानःयेतेअग्नेशिवेतनुवोविराट्स्वराट्येतेअग्नेशिवेतनुवोसम्राट्भिभूःश्चयेतेअ

× गार्हपत्यं अथर्वपितुं मे गोपायेत्यन्वाहार्यपचनं शं योरभूमे गोपायेत्याहवनीयं सप्रथसमां मे गोपायेति ६

ग्नेशिवेतनुवो वि न्यूह्यपरि न्यूह्यते अग्नेशिवेतनुवो अघोरा वप्रन्नि क्षया स्ते अग्नेशिवास्तनुवस्ता भिरुत्तादयति सर्वाभिर्गार्हपत्यं सर्वाभिरन्वाहार्यपचनं सर्वाभिराहवनीयं यजमानो द्वेष्यं ध्यायेत्तया स्ते अग्नेघोरास्तनुवः क्रुद्धत्तस्ता वश्चिकृस्ता हिनस्त्वेत्यादिताभिः पाप्मानं गच्छेत्ताभ्यां मनुवाकाभ्यां अग्नेघोरास्तन्वन्नू दिशतियास्ते अग्नेघोरास्तनुवः स्ताभिरमुं पाप्मानं गच्छेत्येतेनैव यजुषा वा तनुभिरुपस्थानं घोरानुद्दिशनं त्रयाणामेकनात्सभ्यावसथ्ययोर्नास्ति अमुमिति द्वेषणनामयद्वेषणं अथापउपस्पृश्यत्रैवतिष्ठन्विराजं क्रमेरुपतिष्ठतेनर्यप्रजां मे पायेति सभ्यं अहर्बुध्नियमन्त्रं मे गोपायेत्यावसथीयं ततो गृह्योक्तविधिनाज्यं संस्कृत्य स्रुक्चतुर्गृहीतं गृहीत्वाहवनीयकांक्षमिधमाधाय परिस्तीर्य वापूर्णाहुतिं जुहोति सकृत्ते अग्नइति पूर्णाहुतौ वरं ददाति वरस्त्रगवादिः स्रुक्स्रुवौ मन्निहोत्रं इति पूर्णाहुतौ हुते नेत्स्रुक्स्रुवौ मन्निहोत्रं अपि वात्स्रुक्स्रुवौ मन्निहोत्रमेव जुहुयात्न पूर्णाहुतिं पुनरा ज्यं संस्कृत्य वातनैव वा स्रुवेण कूष्माण्डानि जुहोति यद्दादवहेत्न। यद्दीयं न्नण महं बभूव आयुष्ट

गो राम ॥१६॥

विश्वतादधति त्रिभिरनुवाकैः प्रत्यृचमाज्यस्य हुत्वा वैश्वानरायप्रतिवेदयामदित्यनुवाकेनोपस्थायसमिधमाधाय वरं दत्वाततो अग्निहोत्रहोमः अस्मिन्नग्निहोत्रे सवेति कर्मव्यतात्स्रुक्स्रुवौ हुदाहवनात्प्रधानस्य वत्स्रुक्स्रुवभावात्तदंगे धिपितत्स्रुक्स्रुवमिति गम्पतेऽन्यआहुः प्रधानेत्स्रुक्स्रुवमेवहोतव्यमित्येवधारणादन्येतिकर्मव्यतासमंत्रसवेत्स्रुक्स्रुवमितिमंत्रनिवृत्यर्थत्वात्तदेवताध्येयाअग्निहोत्रपात्राणि प्रक्षाल्यकलेवास्तनाधारणफलकांतस्यावाहुदन्यंनिसादयित्वाज्यमानीयपरिषेकंकरोतिस्रुतसंत्यंत्वासत्येनत्वेनपरिषेचयामीतिस्रुज्यंगार्हपत्येधिश्रित्याभिघारणेनाभिघार्यामृतमसीतिदर्वीयंनिधायसमानंकर्मनियनात्हवतुर्गृहीतंउन्नीयसमानमभिमर्शनात्अभिमर्शनमंत्रःसज्रूर्देवैःसायंप्रातर्यावभिःसायंप्रातर्यावाणमादत्ताइतिविशेषःततःसमानमासमिदाधानात्समिदाधानेविशेषनजनतांहरिणीत्वाअग्निस्तूर्यज्योतिषावायुमतीरात्रिमरक्षतिष्ठकासुपदधमृतंप्राणेदधामिप्रजापतिस्त्वासादयत्विति समानेमाहोमात्सर्वंप्रातर्देवतेध्यात्वासकृदेवहुत्वासकृदेवाज्यकूर्चेस्रुवंनिधायगार्हपत्यावेक्षणंकृत्वाप्रजापतयेस्वाहेति

ति

मंत्रेणमनसाकृत्वाजिरतिवाल्यादावीनमवमृज्योर्ध्वमुत्सृज्यप्रशानमंत्रेविशेषःअग्निःसूर्यप्रजाप
तिमितिपूर्ववत्परिषेचनंजपस्तानंनास्तितत्तदृष्टीनांतंत्रसमासपक्षोवक्ष्यतेदेवागातुविदइतिजपि
त्वाअग्नयेग्नयेपवमानायान्वाधानादिकरोतिबर्हिर्लबर्हिर्लवितारंबर्हिषोविप्रकृष्टदेशत्वेन्यत्रहरणंति
आहृतंवायजुषाकरोतिआहृतेबर्हिषिमंत्रेणजुवनादिकरोतिवाअग्नयेग्नयेपवमानायाष्टाकपालो
पंचदशसामिधेन्यःआधानेष्टयःसर्वोजपांशुभवतितततःदृष्टीनांविशेषएवोच्यतेअथएष्यांस्तीर्तिति
अग्न्याधादस्तत्रस्योपलक्षणंयत्रकचहविर्निर्वृप्येत्स्यात्सामिधेनीर्वाअनुवक्ष्यन्दशहोतारंव्या
वक्षीतअग्न्याधेपिकषेवतंत्रेषुदशहोतारंव्याक्षीतवाअग्नयेष्टाकपालंदशहोतारंव्याक्षीतवात्रिष्टु
भोसंयाजोपिप्रीहिदेवन्नग्नयदद्धतिअग्नयेःपवमानस्याहमन्नादःउर्ज्जितिन्वोहार्यमासाधएतस्मिन्
कालेअग्न्याधेयदक्षिणांददातिसाधारण्येनाद्वादशभ्यःइतिब्रह्मणाधीताःसप्तान्यागावोदेयाःयावद्वाद
शनवंतानदेवददातिदानक्रमज्ञप्यतेप्रजापतेर्भागोसीत्यनेनमंत्रेणयथालिंगमूहेनाभिमंत्रणं

कृत्वाउपबर्हणमग्नीधेददातिअग्नीत्रुबेपेहणंतत्प्रतिगृह्णीषेतिअश्वंबर्हिर्वेदिस्थंतदर्भेणाभिमंत्रय
तेमनोयथास्थितएवतंब्रह्मणेददातिधेनुंस्त्रीलिंगेनाभिमंत्रणंकृत्वातांहोत्रेददातिअनड्वाहंगोमध्ये
स्थितमध्वर्यवेददातितेप्रतिगृह्णंतिप्रतियहमंत्रेविशेषःब्रह्मणउपबर्हणंब्रह्मणश्चंब्रह्मणेकनुब्रह्मणेन
ड्वाहमित्यादितोमिथुनंददातिमिथुनयोःसर्वत्रपुल्लिंगेनद्विवचनेनानुमंत्रणंब्रह्मणेमिथुनागावोयथा
भागंप्रतिगृह्णीध्वंवासोददातीतिवासानुमंत्रणंउपबर्हणवद्ददतेपिसर्वेभ्यःततःसप्तगाददातिअथवा
ससोपबर्हणेनचसप्तदत्तभवंतिशिष्टाःपंचगावोदेयातेषांबहुवचनेनपुल्लिंगेनाभिमंत्रणंतेपिसर्वेभ्यो ब्र
ह्मणेगावइतिप्रतियहमंत्रःअथवासोमायवासःरुद्रायगांवरुणायाश्वमितिप्रतियहमंत्रःततःसमानं
ब्राह्मणतर्पणांतंगवादीनामभावेवासांस्येवतावंतिवाददातिमंथान्वाओदनान्वाएतावंतोद्द्यात्।एकांगं
वादद्यात्अथयतदानमिवएष्यामिति सर्वाण्यन्वाधानादितंत्रंएष्यास्तरणंनलस्यतेततोग्नयेपा
वकायाग्नयेशुचयेवान्वाधानादितावष्टा पकपालोपंचदशसामिधेन्यःअग्नेःपावकस्याहमन्नादःअग्नेः

शुचेरहमन्नादः अग्नेः पावकस्याहमुज्जि तिं अग्नेः शुचेरहमुज्जितिं अन्वाहार्यमासाद्यत्रिंशन्मानं व
तारिंशन्मानेहिरण्यं ददाति अग्नयेहिर ण्यमिति॥ प्रतिग्रहमंत्रः साऽसिद्धेऽसंतिष्ठतेततइंद्राग्नि
भ्यामदित्येवान्वाधानादिऐंद्राग्नमेकादश कपालंमादित्यंघृतेवरुमिति अन्वाधानादिधर्मसन्नहनवि
शेषः ततस्त्वांत्रयोविंशतिधेतिकेचित्। अदित्वरुंघृतेश्रपयतिश्रृतेनदीयसीवाऽदकरवश्रृतप्रायेघृत
मानयति अदित्याअहमन्नादः आग्नेयविकारत्वात्जपांशुयाज्यवरुपक्षेतद्विकारत्वात्तदधिरसीति
आवार्यवचनेनैंद्राग्नंचतुर्धाकरणंतंदक्षिणंपुरोडाशंचतुर्धाकृत्वाबर्हिषदंकरोतीतिवचनात्सर्वाएवैता
दृष्टिर्दक्षिणावतीः अर्यतेतिस्वतिस्वएकैकस्मादद्यात्मिथुनावुत्तमायांवादर्शनेवतस्वश्चतस्वएकैक
स्मादद्यात्मिथुनावुत्तमायांवाअन्वाहार्यमासाद्यअथैतमादित्यंवरुंसुहृत्यवत्वारआर्षेयाःप्राभृति
साऽसिद्धेष्टिःसंतिष्ठतेऐंद्रामादित्ययोरंतेसमाप्तावाधानस्याश्वपदिकमाहवनीयमुत्सृज्यान्यमुद्ध

त्यदशहोतारंकृत्वोत्सृजेत्पुनःस्वकालेऽग्निहोत्रार्थंमंत्रवदुद्धरणंमग्निहोत्रमारभेतअसंस्थितेग्न्याधानेप
त्न्यानालंभकायदृविरमत्तत्रतेनैवस्तत्वाशेषंसमापयेदृष्ट्वान्वारंभणीयायांपाशुकेवैकृतेष्विष्टिव्रताद्
र्धमृतुंदृष्ट्वाऽर्यीकार्यंनालोपयेत्प्रजापतिवचनंआवार्येणाप्यक्तंयस्यवत्यैहव्यंलप्स्यनालंशुकाभव
तितामवरुध्ययजेतेऽग्न्याधानप्रकृत्येवतामवरुध्ययजेतेऽक्तंतस्माद्दुर्वानिरूपणीयंततोदादशा
हव्रतंचरतिअग्निहोत्रोच्छेषणव्रतोवायजमानोभवतिभक्तमेवपत्न्यश्नातितस्मिन्व्रतेऽन्नेतंनवक्तव्यंअमृ
न्मयपायीनवेलेणमांसकौशीधान्यंवर्जंअन्यत्रतिलदध्नंनस्त्रियमुपेयात्भस्मसारविनावासःपत्यूलनं
नकोतिशूद्रायोच्छिष्टंनदद्यात्आत्मनःपादौस्वयमेवप्रक्षालयेतआत्मयमेवसमिधमाहृत्याग्निमाधेयेत्स्व
स्यगृहेऽग्निब्राह्मणोनवसेत्एतद्व्रतंदादशाहंचरेत्एतद्व्रतंसोमाधानेनास्तिअग्न्याधानेविकल्पइति
केचित्। ततोन्वारंभेष्टिरुच्यतेपूर्वेद्युर्नांदीमुखंकृत्वाश्राद्धंअपरेद्युःस्नानपवनमंत्रावमनादिकृत्वापु
ण्याहंवाचयित्वाजपव्याहरणादिप्रपद्यतेयाःपुरस्तादित्यादिआग्नेयरणेमंत्रवत्स्वर्गेकामोदर्शपूर्णमासा

दारभ्यमानोन्वारंभणीयेष्टायज्ञदृतिसंकल्पः।उद्धरणपत्नेनिद्रयंविहव्यदेवतासंकल्पंकृत्वापो
र्णमास्यन्वारंभणीययोस्तंत्रेणान्वाधीतिद्व्योरिध्मबर्हिषांसंनरत्रथवान्वारभ्यतेनेनदर्शपो
र्णमासावित्यन्वारंभः।अन्वारंभणीयेत्यर्थःसमानउपवसथोस्यतिसमानोपवसथःतपौर्णमास्याअं
गमितिगुणलोपेसत्यापष्ठीतृतीयार्थेषष्ठीवापौर्णमास्यपूर्वेधरुपवसथःतस्यातिपुरापांग्रणयना
त्प्राग्निरुक्तोदेशस्यविशेषितालक्ष्मीरंभनात्प्राग्नित्यर्थःततश्चपाणिसंमर्शनात्प्राग्नित्यरुक्तंभवति
एवमेवक्तव्यंपुरापांग्रणयनात्दृष्टरुक्तउत्तरत्रएष्यास्तीतिवचनात्पर्ष्यास्तरणात्प्राग
पीतिगम्यतएष्यास्तरणात्पूर्ववापाणिसंमर्शनात्तत्पूर्ववास्मात्नेवदाज्यंसंस्कृत्यस्रुक्रुक्स्रुवंनि
ष्प्यसंमृज्यस्रुचिचतुर्गृहीतंगृहीत्वापृथिवीहोतेत्यनुवाकंमनसानुद्रुत्यादृवनीयेजुहोतिअन्वा
रंभ्यजमानेस्वाहेतितत्तेनैवाज्येनस्रुवेणकृष्मांडानिरुलोपस्त्रायस्रुचिचतुर्गृहीतंगृहीत्वासा

GURUKULA KANGRI VISHWAVIDYALAYA

रस्वतोहोमोजुहोतिपूर्णापश्चादित्यनुद्रुत्यामीषोमावितिजुहोतिअपरंचतुर्गृहीतंगृहीत्वानि
वशनीसंगमनीवस्तोमित्यनुद्रुत्यायन्तेदेवाअदधुरितिजुहोतितताइष्टिरारभ्यतेआग्नावैष्णवमे
कादशकपालंसरस्वत्यैवरुंसरस्वतेद्वादशकपालंपौष्णंद्वादशसामिधेन्यास्तंत्रंसमानंकृत्वानुमंत्रणे
विशेषःअग्नीषविष्णोरहंवीर्यवान्भूयासंसरस्वतैअहंवाचमन्नाद्यंपुषेयंसरस्वतोहंब्रह्मवर्चसेना
यासंअग्नाविष्णोरहमुज्जितिमन्नऊर्जेसरस्वत्याअहमुज्जितिंसरस्वतोहमुज्जितिंअन्वाहार्यमासा
यमिथुनोगावोददातिब्राह्मणगामितिघृतियहमंत्रःरुद्रायगामितिवासमान्मतऊर्ध्वंसंतिष्ठ
तएषेष्टिःततःश्वोभूतेपौर्णमासेवैष्णव्यांयजतअपिवाचतुर्होतारंसारस्वतोहोमोजपवसथेहि
कृत्वाइतरेष्टिहनिःकुर्यात्स्वतुर्होतारंसुषोपवसथेकृत्वाइतरेष्टिंहनिःकुर्यात्वाचतुर्होत्रादिस
र्वमेवेष्टहनिःकुर्यादाग्नाधानमध्येस्याःपात्रप्रयोजनंपवमानेष्टिवदन्यापिविनाद्रव्यंपादाम

फलं नास्तीति ख्यापनार्थं आधानवच्च यावज्जीवं दर्शपूर्णमाससाधारणत्वस्यपनं वा वयापि विनाग्नी
नामयोग्यत्वाच्च अथ पौर्णमासेमधाभ्यामित्यपि अत्र पाठे प्रयोजनं समानोपवसथवचनात् क्रम
परिच्छेदार्थमस्याफलख्यापनार्थं चैतदास्याफलमिति कृत्तिकादिषाधानस्यानियतकालत्वादाधानान
तरमावास्यापि तत्रापि पौर्णमासेनेष्ट्वा सर्वकर्मारंभः अमावास्येति॥ ॥इतिकेशवस्वामिकृतेप्रयोग
सारेतृतीयेतन्त्रीयः॥ ॥इत्याधानंसंपूर्णं॥ ॥योग्राधेयेननश्येतिसपुनराधेयमादत्तइति आधानका
लादारभ्यसंवत्सरसमापनात्पुत्रजन्मादिबंधनांपशूनांवधनस्यवाहानिर्यस्यप्रजायतेतस्याग्न्याधान
मुच्यतेअग्नीपुनराधास्यमानोभवतीतितस्मिन्पुनराधेयेआहुर्ब्रह्मवादिनःकतियज्ञुर्यजमानःयजूंषि
सर्वाणिउद्वन्यमानमस्याग्रमध्यमित्यादयःयजुरितिकेचित्नयजूंकर्तव्यमित्यन्येआधानयज्ञधर्मः
शिरइत्यादीनिअश्वोखल्वित्येनमुष्टिसृजमाहुःब्रह्मणोपत्यासाद्यमप्यस्तिपक्षेःइत्यस्तुगृहीतव्यख्या
पनार्थंपुनःनिकृतंविशीर्णंपुनःसंस्कृतंपुनरुत्सृतंपुनःसंस्कृतंपुनस्सृष्टंदौर्बल्यात्कर्मणउत्सृष्टंविस्र

भिकाकपालाःअग्न्याधेयिकाःउषाश्चेत्यादयःआषाढ्याःपौर्णमास्यापुरस्तादमावास्यानवतिसासकृत्सं
वत्सरस्यपुनस्सुभ्यांसंपद्यतेसापुनर्वसुभ्यामित्येवंसिद्धेसकृत्संवत्सरस्येतिकदाचिद्भवतिकदाचिन्नेति
यदासंपद्यतेतदाप्रथमःकल्पअसंपन्नेनक्षत्रमवगृहीतव्यंपुनर्वस्वोरादधीततद्धिपुनराधेयस्यनक्षत्रमि
तिब्राह्मणवचनात्तस्याउ——सथइतिअमावास्यायाःपूर्वेधुरितिनक्षत्रग्रहणपक्षउदगयनआपू
र्यमाणपक्षपुनर्वस्वोःकर्तव्यंवसंतेग्न्याधेयकृतेनिमित्तेजातउक्तकालेवाकर्तव्यंतस्यपूर्वेधुरवारण्यो
रानिन्समारोप्यपूर्वस्मादन्यस्मिन्स्थानेमथित्वाग्नीन्चिदित्याग्नेयमष्टकपालंनिर्वपतिवैश्वानरद्वादश
कपालंनिर्वपतिसाप्रसिद्धेष्टिःसंतिष्ठतेअथतदानीमरणीसमुद्यानिर्वपेदुद्वास्यपुनरादधीतेतिश्रु
तेःपात्राण्वन्यानिकृत्वातान्येवतत्क्षणादिकृत्वातदीतश्रेत्यागारंनवंकृत्वातदेववाउपलेपनादिपुनःसं
स्कृत्यलौकिकाग्निनिधायपुनस्त्वादित्यादिपातइतिमंत्रेणदर्भकलायंसंभरतिब्रह्मोदनाग्निगार्हप
त्यस्यपश्चाद्ब्रह्मोदनाग्निविच्छिन्नाधानेपिउपव्याहरतिअत्रेतावान्विशेषःऋद्धिकामोग्नीपुनरा

लौकिकाग्निंकृत्वादीतश्रेत्यागारंनवंकृत्वातदेववाउपलेपनादिपुनःसंस्कृत्य

धास्यद्दृंहत्कासंभारान्संनरतिमुंजन्नलायमंत्रेणदर्भन्नलायंसंनरतिब्रह्मोदनाग्निंगार्हपत्यस्यपश्चा
द्ब्रह्मोदनाग्निःस्थानंतत्रापोह्यनस्मदर्भन्नलायंनिधायमंथनमाथित्वाप्रांवमुद्धरतीतिगार्हपत्याभिप्राय
प्रायहणंचैवार्थवद्भवतिइतरथासिद्धत्वात्प्राग्ग्रहणंनकर्त्तव्यंस्यान्नदर्भेगार्हपत्यस्यमादधातीतिब्रुवन्
नेषब्राह्मणार्थइतिबोधयतिएवंसत्याधानेपिअथैतमादधातीतिरेतदुपपद्यतेतत्रगार्हपत्यस्यायतन
उपरिसंभारेषुमुंजन्नलायमितिब्रुवन्नयमितिब्राह्मणार्थःतस्माद्गार्हपत्यस्यायतनएवब्रह्मोदनाग्निः
तत्रेवापोह्यनस्मामिमंथतिमथित्वाप्रांवमुद्धरतिआहवनीयाभिप्रायइतिबोधयतिउभयस्यब्राह्मणा
र्थत्वादुभयत्राधिकल्पइतिज्ञापयतितस्माद्गार्हपत्यस्यायतनेवाब्रह्मोदनाग्निनिधायतस्मिन्ब्रह्मोदन
श्रपयित्वातस्मिन्दर्भन्नलायनिधायतस्मिन्मथित्वातस्मिन्दर्भन्नलायान्निःक्षिप्यतेगार्हपत्यमादधा
तिआधानविशेषःभ्रुवोवाघर्मःशिरइत्यत्रकाभ्रुमिर्भ्रुमेतिवतस्वरुवइत्यत्रकाभ्रुगाणामित्यादिस
मानंदर्भन्नलायेरन्नाहार्यपवनस्याधानंप्रकृतिवदाहवनीयमपिदर्भन्नलायेरन्दधीतभ्रुवोवर्म

१४ इदइतितिसृणामित्यादिसमानंअथगार्हपत्यंभ्रुवोवर्मःशिरइत्यत्रकाव

वरकेश्वरकृत्याय्यत्रकायत्वाभ्रूमिर्भ्रूमेतिषड्वइत्यत्रकाअहंवस्मीतिनित्येनोपस्थायमनोज्योतिर्ज
षतामित्यनयारुपतिष्ठतेअस्मिन्यज्ञेआहवनीयाधानंप्रकृतिवदस्मापोहत्यधर्मःशिरएतत्स्था
नेसपरा——रावपतिनित्येनोपस्थापपौनराधिकेनोपतिष्ठतेवासमानंकर्मरथचक्रात्याकेनकश्चि
द्विशेषःसमानंकर्मपूर्वेणेतिवक्तव्यःआरथचक्रादितिब्रुवन्रथचक्रादनंतरंसप्ततेअग्निहो
त्रंततःसर्वौषधशमनादीनिततश्चाग्निहोत्रंवाअग्निहोत्रकालोवाविकल्पइतिज्ञापयतिततःआग्नेयं
पवकपालंपंचदशसामिधेन्यःपुनराधेयस्योपांशुभवत्यास्विष्टकृतःप्रभृत्यैंद्रैःस्विष्टकृतमुत्स्रु
जतीतिवचनात्वैभक्त्यादिबहवोवाएवंजातितस्मादेतेनोर्ध्वंपुरोडाशस्यपुरस्तात्पुनरूर्जेतिहुत्वा
तितःपुरोडाशमिष्ट्वाअनंतरंसहस्यंतिहुत्वातिश्रेत्प्रजनागयोरुयथापूर्वमाज्यभागोस्यातां
मितिश्रुतेःवार्त्रघ्नोस्यातांवृधन्वेत्याग्नेयस्याज्यभागस्येतिदर्शनात्वृधन्वतोस्यातांवाग्निष्टो

मनवाधयत्वन्नसोमेत्येतौस्यातांवायथाप्रकृतिपत्नीसंयाजाःअन्वाहार्यमासाद्यपुनराधेयदक्षि
णांददातिपुनर्निष्कृतंस्थंपुनरुत्सृतंवासःपुनरुत्सृष्टमनड्वाहंएतामिष्टिंसमाप्यअग्निवरुणस्यैका
दशकपालस्यान्वाधानादिप्रपद्यतेसमानमन्वाहार्यमासाद्यानड्वाहंददातिसाग्निदुष्टिःसंतिष्ठते
अपिवाग्नेयमष्टाकपालंनिर्वपतेतस्यासमुदितेअग्न्याधेयदक्षिणांदद्यात्आग्नेयंपंचकपालंते
नासमुदितेनस्विष्टकृतःपूर्वंपुनराधेयदक्षिणांदद्यात्अथैंद्राग्नमादित्यंचरुंअथाग्निवारुणंवाद्वा
दशाहस्यपुराडाशस्यपरिहोमंदेवतंपरिजुहुयाद्वास्विष्टकृतंपरिजुहुयाद्वाऽसमुदितइतिअथवे
भवतीयःपुनराधेयादनाग्निमादधीतसएतान्होमान्जुहुयादितइतराधेयात्पराधीनंजंघंत
तीयमादधानःआग्नेयस्यपंचकपालस्यपुरस्तात्स्विष्टकृतःस्रुवाकृतीरुपजुहोतिलोकश्रद्धकइ
तिप्रथमांकेतःसकेतइतिद्वितीयांविश्वाःअग्निरितितृतीयांसंतिष्ठतेतृतीयाधेयंतृतीयाधानंव

रात्र ॥२२॥

वा

ऋध्यर्थएवमन्यदाधानमेवाग्नेयस्यपुरोडाशस्येतिवचनात्यामेदित्याऋड्मार्भवतामेव
धेतीतिवाक्यविशेषाच्चअथापहतोग्ननेष्टारणीकस्यचअपहताग्निर्नेष्टाग्निःनष्टारणीकःअग्नौस्मा
रापितसतियस्मारणीनाशोभवेत्अनष्टाऽरणीकःतयारुपवसथापवर्जनंअग्निसंधानार्थंःसर्वका
मोमीनाधास्यइत्यधर्यूक्तमप्याधेयंकरोति॥ ॥इतिकेशवस्वामिकृतप्रयोगसारेचतुर्थेप्रथमः॥
॥आधानारंभप्राप्तकारणाद्दर्शपूर्णमासावुक्त्वाक्रमादाधानंसविकारमुक्त्वाग्नेयंतयोर्दग्निहोत्रंतस्तु
यतेअग्निहोत्रस्यवारंभेष्टिश्राद्धंनकारयेत्पवनंप्रोक्षणंकृत्वापुण्याहंवाचयित्वातःतंत्रसमाप्तपक्षे
ऐंद्राग्न्यादित्ययोरंतेसमाप्तावाधानस्याश्वपतिकंआहवनीयमुत्सृज्याग्निहोत्रमारभेत।अपरेणगा
र्हपत्यंप्रोक्षानड्वान्संस्तीर्यपवनितयासहतत्रोपविश्ययाःपुरस्तादित्यादिस्वर्गकामोग्निहोत्रंहोष्य
दितिकेचित्स्वर्गकामोयावज्जीवंअग्निहोत्रंहोष्यदितिऋत्विक्वरणपक्षेअध्वर्युंवृत्वामधुपर्कंदत्वा

आहवनीयमुद्धृत्यपरिस्तीर्यगार्हपत्यआज्यंसंस्कार्यस्रुक्स्रुवंनिष्प्यसंस्रुज्यस्रुचिचतुर्गृहीतंगृ
हीत्वाहवनीयेसमिधमादधातिपरिषिच्यदशहोतारंमनसानुद्रुत्याहवनीयेजुहोतिआन्वारब्धेषडा
मानेत्यादितत्रैववाविहृत्यवास्रुवेकपालंडानिजुहोतिउपस्थायउद्धरणपक्षाग्निःकर्मांतंतस्यधार
णमित्यक्त्वातत्तस्मिन्नेवकपालंडानिजुहोतिउपस्थायउद्धरणपक्षाग्निहृदयमयास्यगोमयेनोपलि
प्यअध्वर्युपक्षेइडादेवहूरितिजपित्वास्वयंहोमपक्षेदशहोत्रादिसर्वयजमानएवयजमानस्येडादे
वहूरितिनास्तिअध्वर्युर्हीतास्याभावेयदिजुहोतितदाइडादेवहूरितिवक्तव्यंपुनरादित्यास्तमय
इतिआसन्नकालोगृह्यतेएवंपुरोदयादितिउपसमाधायप्रज्वाल्यअन्वाहार्यपचनंसमानयोनित्वे
उद्धृत्यनानायानित्वन्यत्राहवनीयमुद्धरतिसायमाहुतयेसायमाहुत्यर्थं
वाहुत्यर्थमितिनियमार्थःप्रातराहुतयेवातत्राहुत्यर्थमेवयदर्थमुद्धृतंवतदर्थमेवनतत्रमि

तिगम्यतेसर्वत्राहवनीयमुद्धरतिवात्वाहोत्रेतिमूर्धनःसुवरुद्धियमाणइतिमंत्रमुच्चाज्वलंतमग्नि
मादायगच्छतिसायंदक्षायदेनइतिप्रातश्चेडाप्रायदेनइतिसायमाहवनीयंप्रणेष्यतःपुरस्तात्प्रत्यङ्
मुखस्तिष्ठन्नग्निंनिदधातिअमृताहुतिमितिअग्निर्नःपेवेश्वानरअमृतंजुहोमिस्वाहेतिसायंस्रु
यमपोवेश्वानरअमृतंजुहोमिस्वाहेतिप्रातःप्रातरपियथोदयात्पूर्वमुद्धरणानंतरमेवोदयसमयो
भवतःअतस्तदोद्धरतिआधानप्रकरणेवैतत्रास्फोजस्वपक्षेपिउदयास्तमयात्पूर्वमेवप्रोक्ष
णादिकरोतिअध्वर्युर्यजमानयोर्बहिःसंध्योपासनास्तिसायंप्रातःपत्न्यग्निहोत्रंआस्तेसायंसायमि
त्येकेवीप्सयासायंसायमेवत्येकेततोआनुपूर्व्येणक्रमणपरिसमुह्यपर्युक्ष्यपरिस्तीर्यगार्हपत्यस्योत्तरतः
कूर्चंवाफलकेवात्रणेषुवापात्राणिप्रक्षाल्यसादयतिअग्निहोत्रस्थालीसस्रुवांअग्निहोत्रहवणी
पालाशंवैकंकतंवासमिधमभिघोतनंतृणमितितोवैकंकरप्पनेररधितेःप्राक्षणोःकाष्ठरम्

समिध्याहवनीयेवर्षयेऽभ्यादधाति अथैतामग्निहोत्रीगांदक्षिणतोविहारस्यउदङ्मुखीस्थापयि
त्वाब्राह्मणादीध्यिज्येष्ठस्यपितुप्रथममजातस्यज्येष्ठत्वयस्याःसाज्येषिनीतद्वत्यंजैषिनेयःपूर्वोदा
पुत्रइत्यर्थःयोवागतश्रीःसुश्रवानित्यादितेषांपूर्वस्तनोप्रथमंदुह्यात्ततोपरोतापरोऽन्नोवप्रथमं
दद्यात्कनिष्ठस्यपश्चाज्जातस्यकनीयसापुत्रस्ययोवाबुभूर्षत्स्नवतुमिच्छेत्तद्भूतिकामस्यकानिष्ठिते
यस्यकनिष्ठस्यवापरोस्तनोप्रथमंदुह्यादितरेषामनियमःवत्समुखनिःसृतंस्तनंसंस्पृशत्पशुकाम
स्यदुग्धेगोःअस्मिन्पक्षेपूर्वंदुग्धमधिश्रित्योत्तरंदुग्धंतस्मिन्नानयतिअथदोहानंतरंअध्वर्युर्दीक्षुद्ध
स्तादादायाग्नेणाहवनीयंपरीत्यावक्रकरोत्युपायजघनेनगार्हपत्यमुपसाद्यान्यद्द्रव्यपक्षेएवमे
वप्रपाद्यत्यतिक्रमेणदक्षिणेनाग्नीन्यरिषिंचतिऋतसत्याभ्यांत्वेत्यनेनेतिसायंसत्यऋताभ्यांत्वेतिप्रातः
ततःश्रपणस्थाल्यामानीयादीवोंगारान्निरूह्यव्यंताङ्कृत्वाधिश्रित्याभिघातेनाभिघातयतिअ

ग्निस्तइतिसक्तवेणायप्रत्यानयतिअमृतमसीतिपुनरेवाभ्योत्यात्रिःपर्यग्निकरोतिअंतरितंरक्ष
इतिसक्तन्मंत्रेणद्विरुल्लीपंथानंकुर्वन्नुदगग्नेप्रत्यूहागारान्पयसोनावेतराणिद्रव्याण्याहृत्यजु
होतितेलंदधिपयःसोमंयवागूरोदनंतंडुलान्मासमाषश्यदशद्रव्याण्युदाहृताःअकामतइतिवाक्या
मार्थेवनियुज्यैतेतान्येवयदिकामतःअनावत्कृत्तराणिस्फःसमेतमेशृतितःआज्यंतेनावधिश्रित्य
अमृतमसीतिदर्भैर्यनिदधातिदधितंडुलवारीणांनाधिश्रयणप्रतिष्ठेनसिद्धहविष्यमेवदनंसो
ममग्नियावमग्नियुत्याग्निगृह्णंतिमांसयवागूतनेवश्रपयितव्यमांसयाज्जीतमवगृह्णातिसर्वेषामग्नि
योतपर्यग्निकरणेवसर्वान्वर्त्मन्कुर्वन्नुदगुदास्यप्रत्यूहागारानादत्तेदक्षिणेनस्रुवंवसमिधंसव्येनाग्नि
होत्रहवणीदेवस्यत्वेत्यादायगार्हपत्यप्रतितपतिप्रत्यृष्टंरक्षःप्रत्यृष्टाअरातयइतिसक्तन्मंत्रेणद्विरुल्ली
कृत्वैस्रुवन्निधायपत्नीयजमानमामंत्रयतेमुन्नयानीत्यामुन्नययजमानोनुजानातियजमानस्यांसन्नि

धाने॒ऽध्वर्युणेवकर्त्तव्यंतश्चतुरस्रवाऽन्नयतिपूर्णान्वानोवाभूरिऽइतिप्रथमंजुहुइऽइतिद्वितीयंजुहुवरिऽइतितृतीयंध्रुवाऽइतिचतुर्थंस्रुवेणाज्यस्रुवौस्रुत्येनयोऽन्यंसंस्पृशतिसऽइदेविःसायंयावभिरितिसायंसऽइदेविःप्रायोतेवभिरितिप्रातःस्रुग्गतंद्रव्यमवाभिस्पृशेदाकूर्चेगार्हपत्यस्यपश्चादुदयन्निधायसमिद्धस्तेनस्रुवंगृहीत्वाकूर्चेसादयतिनस्त्वाग्नाहवनीयस्यगमयंकूर्चेनिधायदक्षिणावृतःगार्हपत्यंप्रतीक्षतेऽउपश्रुतसंगच्छध्वमितितूष्णींहुतिस्रुवेणात्स्रुवमतिहायध्रुवाहुतिस्रुवेणमतिक्रम्येत्यर्थःतस्यामेवसमिध्यन्तरांभूयःपूर्वस्याहुतेर्वहुतरंजुहोतिप्रत्यग्विलयाप्रजापतयेस्वाहेतिमनसातत्स्रुवेनिरतिबाल्यकूर्चेनिधायदृष्टिरसीत्यपऽउपस्पृश्यश्रवोवीनमवस्रुऽयस्रुवायादारभ्यविलान्प्रत्यगुलेनाधोमुखेनपाणिनावमृज्यतथैवचाधोमुखेनपाणिनास्रुवऽउत्तरार्धेऽग्निषधीषुलेपन्निमाष्टिऽग्निषधीभ्यस्त्वौषधिर्जिन्वतिएवमेवद्वितीयमुत्तरस्यदक्षिणतःप्राचीनावीतीपितृभ्यस्

ASR Pandurangi Granthalaya Collection

वापितृभ्यःस्वधाइतिश्रोषधीष्वेवान्माष्टिऽरूपमेवासक्तुपमृज्यद्विर्निर्मृष्टेवाअथापऽउपस्पृश्याद्रिंगुल्याद्रिःप्राभातिऽअंगुल्येतिसगाद्रिनिवृत्तिपरत्वात्तद्वतसंख्यानविवक्षितेनयथाशक्यतेतथाऽअंगुल्यावाऽअंगुलीभ्याप्राभातिऽउदङ्पर्यावृत्यऽउदङ्मुखआसीनःप्राचीनदंडयास्रुवानक्षयतिऽउदग्दंडयावाऽइदंदृविःप्रजननमितिऽग्निःप्रजामितिऽग्निःप्रजामितिसायंसूर्यःप्रजामितिप्रातःस्रुवानक्षयतीतिनिर्नेजनंनिष्टपनकरणनिर्देशोपपत्तेःऽन्यऽआहुःश्रवोधिकरणेऽन्यस्वाधिकरस्याभावादधिकरणकरणनिर्देशःसाधकतमविवक्षयातत्रस्रुकस्रुवंद्रव्यंसामर्थ्याद्वस्तेनभक्षयतीतिदर्शैरिद्धैःस्रुवंनिर्नेज्यनिष्टप्याद्रिःपूरयित्वाऽउदगुद्दिशतिसप्तऋषीन्प्रीणाहीतिगार्हपत्यस्यपश्चादपोनिनयेदैशानायप्रजाःपशवोमेरक्षन्तामितिश्रयेणगार्हपत्यंवादक्षशरोतारंजपित्वाऽदितेःप्रदेशादादायभ्रुवंसंवरुवंतरित्रमन्विहीतिजपित्वाप्रागतितंतःजघनेनाहवनीयमुपसादयतिकूर्चेनिदैशानाय

प्रजामसृजेति प्रथमेऽग्निहोत्रेयजमानोपिसहसूर्युवसुवरितिसादयतिसएवमेवसंवत्सरे
पयंवेतत्स्वाएवाग्नेयमेवसादयेत्आहवनीयंसमिध्यदग्निमुद्धरतीत्यस्यानुवाकस्यस
मावस्थानंतदासंपादयेत्सावेस्थाकवित्भस्मना।छिन्नाकविच्छुनायतिएषमुख्य
अस्यासंपादयतुशक्रस्यपूर्ववस्थास्कवातेषमुत्तरोत्तरश्रेयानृतंतःसमिधमाहव
नीयस्यमध्येभ्यादधातिरज्जुंवाग्निर्ज्योतिषमितिसायंहरिणीत्वासूर्य्यज्योतिषमितिप्रा
तःतयादेवतंकरोतितयादेवतयागिरस्थितिसमिधंस्पृष्ट्वाब्रूयात्प्रतिष्ठापनंवैकरो ति
एवमेवसूददोहसंतताअस्यसूददोहसदतितोविघ्नदर्शीत्यपउपस्पृश्यतस्यामादीक्षा
यांप्रतिमुखंजुहोतिप्रतिमुखमित्यृक्तराहुत्यैसंपूर्वहुतिःप्राश्चित्रंयाघृत्यश्चित्रयाऽउन
राहुतिःअग्निर्ज्योतिर्ज्योतिःसूर्य्यस्वाहेतिसायंसूर्य्यज्योतिर्ज्योतिरग्निःस्वाहेतिप्रातःअथवा

॥२६॥

अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहेतिसायंसूर्य्योज्योतिर्ज्योतिःसूर्य्यइतिप्रातःसंसृष्टहोमौविकल्प
इतिकेचित्तद्विशेषवचनात्अन्येसंसृष्टहोमानुदितेहोमेनब्राह्मणवाक्यशेषप्रकरणा
त्समितितनःस्रुवामाहवनीयस्योपरिगमयंकृत्वेनिधायदक्षिणाकृतऽग्नाहपत्यंप्रतीक्षते
उपस्रेतसंगृह्यधमितितनःपूर्वाहुतिस्थानात्स्रुवमतिहायपूर्वाहुतिस्थानमतिक्रम्ये
त्यर्थःतस्यामेवसमिधिक्तरांभूयपूर्वस्याहुतोबहुतरंजुहोतिप्रत्यञ्चिलयाघृताप्तेयेस्वा
हेतिमनसाततःस्रुवनिरतिहाल्यकूर्चेनिधायदृषिरसीत्यपउपस्पृश्यअर्वाचीनमयस्रुव
स्कयादारभ्याबिलान्प्रगृह्यतेनोधोमुखेनपाणिनावमृज्यतथैवोर्ध्वोमुखेनपाणि
नास्रुवउत्तरार्धेओषधीषुतेपंनिमार्ष्टिओषधीभ्यस्त्वेतिएवमेवद्वितीयमुत्स्रुवपद
क्षिणंतःप्राचीनावीतिपितृभ्यस्वाधारयामीतिओषधीघेवोन्मार्ष्टिद्विरूपमृजे

द्वासक्तपमृज्यद्भिर्मिञ्जेत्वा अथापउपस्पृश्यहिरण्मयीभ्यां प्राश्नाति अंगुल्येति स्म
गादिनिवृत्तिपरत्वात्तत्कृतसंख्यानविवक्षतेन यथाशक्तेतथा अंगुल्यावा अंगु
लीभ्यां प्राश्नाति उदङ्पर्याहृत्य उदङ्पर्याहृत्य उदङ्मुख आसीनः प्राचीनदंडया
स्कवाभक्षयति उदग्दंडयावा दूदंहविः प्रजननमिति अग्निः प्रजामिति अग्निः प्रजामिति
सायंसूर्यः प्रजामिति प्रातःस्कवाभक्षयतीतिनिर्नेजननिष्पन्नकरणनिर्देशोपपत्तेः
अन्यथाहुः अवोधिकरणेन्यस्याधिकरस्याभावादधिकरणेकरणनिर्देशः साधक
तमविवक्षयातनश्चस्कूस्रुवंसामर्थ्याद्स्रुवेनभक्षयतीतिदर्भैरिध्मंस्रुवंनिर्नीयनिष्ट ॥२७॥
प्याज्यंपूरयित्वाउदगुदिशतिसन्नरूपेरन्त्रीणीहीतिगार्हपत्यस्योपश्चात्तदयोनि न
यतिइदमग्नावैश्वानरेअमृतंजुहोमीतिअग्नेभ्यामक्षिणाहुतिंजुहोमीस्वाहेत्येतवैदि

निनयतिशेषंनिधायउपसमिध्यपूर्ववत्परिषेकंकरोतिहोष्यन्यथाहितमग्नीउपरिषिं
वेदुत्वाआहवनीयमेवैकंपरिषिंविद्वान्होष्यन्नेवहुत्वाहवनीयमेकंपरिषिंवेद्वानेवर्षिं
वेदित्येवमपरंवापरिषेकंकृत्वापत्नीयजमानयोरंजलावपोनिनयति॥ ॥चतुर्थे
द्वितीयः॥ ॥अग्निहोत्रानंतरमुपस्थानंतस्यतेअथसायंहुतेग्निहोत्रहवणादियज्ञो
पवीत्यपस्याचमेत्यित्वावरसिद्धत्वाद्शेषाथवनंअग्निनेनवाससावोत्तरासंगीआच
मनंमंत्रवत्कृत्वायजमानायतेनसम्मिस्याणिःयोवाअग्निंप्रत्यङ्अग्निमभिमुखउप
तिष्ठतेतंप्रतिहंत्यग्निःयःपराङ्पराङ्मुखेनसंप्रजयापशुभिर्वियुज्यतेतस्मात्वंवाति
र्यङ्वोपतिष्ठातातस्मादीपत्तिर्यङ्वोपतिष्ठतइतिसर्वास्मुपस्थानविधिःएवंति
ष्ठताहवनीयमुपतिष्ठतेषडृतवोग्नेपावमानीरित्याहवनीयमेवोपतिष्ठतेषडृतवोग्नि

पावमानीभि निर्यहणात्संवत्सरस्यपरस्तादग्निपावमानीभिर्गार्हपत्यमुपतिष्ठतइत्युक्तं
संवत्सरंयोक्तंमाहवनीयमेवैताभिरुपस्थायसंवत्सरापदिवसेएताभिरग्निपावमानी
भिर्गार्हपत्यमुपस्थायततःपूर्ववत्सर्वाभिरुपस्थायअपरेद्युर्वारभ्यपूर्ववद्देवाहवनीय
मेवोपतिष्ठतेततःआहवनीयमुपतिष्ठतेआयुर्दाअग्नेसीत्यथरात्रिमुपतिष्ठतेविश्वा
वसोइत्यथाआहवनीयेसमिधमादधातीधानास्त्वेत्यथआहवनीयमुपतिष्ठतेसं
त्वमग्नइत्यथगृहांश्चापशूंश्चोपतिष्ठतेसंपश्यामीतिगृहेष्वेवभावैपिमंत्रोद्यारणंकु
र्यात्अथाग्निरुक्थैर्वत्समभिमृशतिसंहितासीत्यथद्विपदान्निपदाभिगार्हपत्यमुपतिष्ठ
तेऽपत्यानेदिवेदिवइत्यथगृहांश्चपशूंश्चोपतिष्ठतेऽऊर्जंवःपश्यामीत्यथादित्य
मुपतिष्ठतेसत्सवितुःसोमानस्वरणमितिहाभ्यांअथरात्रिमुपतिष्ठतेकदावनस्तरीरसी

ति।अथआहवनीयमुपतिष्ठतेपरित्वाग्नेपुरंवयंअग्नेगृहपतेइहाभ्यांनामाशिषमाशास्तेमह्यमि
त्यूक्त्वाआत्मनोनामधेयंचतुर्थ्यंतेनगृहीत्वाततोज्योतिष्मतीमित्युक्त्वापुनरुक्त्वामाशिषमित्यु
क्त्वायावंतःपुत्रासजीवानवंतितेषांनामानिचतुर्थ्यंतंयथाक्रममुक्त्वासर्वेषांज्योतिष्मतीता
माशिषमित्यनुषगातेषुसमाप्तामाशिषमाशास्तेंतंवेज्योतिष्मतीत्यंतंब्रूयात्।अथवापुत्रेभ्यः
प्रथमंसांसीनाथात्मनेयंतंवतवेति॥अथवाव्याहृतिभिरुपस्थायभर्तुश्चेत्कंचअश्रद्धा
मापिगाद्विजयावै।प्रोषितोयजमानःअस्यांदिश्यस्यैतांदिशमभिमुखंतत्रैवतिष्ठंनुप
तिष्ठतेयजमानंनसमिधमधर्युस्तूष्णीमभ्यादध्यात्॥ चतुर्थेतनीयः॥ ॥ततोनित्यो
त्थायापरार्धंतरंदर्शपूर्णमासंधात्॥पिंडपित्रयस्यैतेनंगत्वाभिप्रायादिहारंभः॥तथापित्र
थपराह्णेपिंडपित्रयज्ञेनचरतीकल्पंतत्रैवपिंडपित्रयज्ञोविवृतः॥ चतुर्थचतुर्थः॥ ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

शुक्लपक्षेदेवदिने रेवत्यांपौर्णमासीवानित्यकर्मनिमित्तेष्टिपशुनांप्रकृतिवत्॥अथाधानं निमित्तेष्वायजेतप्रकृत्योक्तेर्यात्॥नित्याआग्रयणादयःकाम्याऐंद्राग्रयणादयः॥काम्याऐंद्राग्नःसौर्यादयः॥नैमित्तिकाःजातेष्टिगृहदाहेष्वादयः॥आग्रयणादिषुनंगभूतेषुकर्मसुआद्यप्रयोगेपूर्वेद्युःश्राद्धंकृत्वाअपरेद्युर्ब्राह्मणभोजनंकृत्वापुण्याहादयःकर्तव्याःसर्वत्रायमेवक्रमः॥निमित्तेकर्मांगत्वेनयेप्रायश्चित्तेष्वादयःस्युस्तेतदारंभावारभ्याः॥यथाकपालनाशेष्टिःपाथिकृतेष्टिःस्तेषुब्राह्मणभोजनादयोवैनकर्तव्याः॥तत्तत्रब्रीह्याग्रयणमेव॥अथवाग्न्यस्त्रिवैतानिवा॥यस्मिंदेशेव्रीहयएवपच्यंतेतत्रव्रीह्याग्रयणमेव॥तथापित्र्याणांप्रयोगोवक्ष्यते॥वर्षासुश्यामाकानामितित्रज्ञातउपवसथःपौर्णमासीप्रोग्यन्वाधानादिवैदिकरणांतःसोपवसथइत्यस्मिन्पक्षेवेनुर्द

राम ॥२९॥

श्यामुपवसथःपंचदश्यागः॥अथवावैकृतीनामिष्टीनांपशूनांवसथस्कालत्वमुक्तं॥ ॥ ॥इतिश्रीकेशवस्वामिकृतेप्रयोगसारेआधानप्रकरणंसमाप्तं॥ ॥छ॥ ॥शकें १६८२ रौद्रसंवत्सरेश्रावणशुक्लतृतीयातद्दिनीचित्रांवोपनाम्न्यंबकनंदस्यसुतेनविष्णुनंदेनलेखितमिदंपुस्तकंशुभमस्तु॥ ॥श्रीएकवीरार्पणमस्तु॥ ॥

राम ॥३०॥